ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

# 3.कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टकं

## 3.8 तैत्तिरीय ब्राह्मणे तृतीयाष्टके अष्टमः प्रपाठकः

(अश्वमेधब्राह्मणं वैश्वदेवं काण्डं)

### 3.8.1 अनुवाकं 1 –सांग्रहण्येष्ट्यादयः याजमानसंस्काराः

**T.B.3.8.1.1**

सांग्रहण्येष्ट्या यजते । इमां जनता॒ꣳ संगृह्णानीति ॥
द्वादशारत्नी रशना भवति । द्वादश मासाः सम्̐वथ्सरः ।
सम्̐वथ्सरमेवा वरुन्धे । मौञ्जी भवति । ऊर्ग्वै मुञ्जाः ।
ऊर्जमे वा वरुन्धे ॥ चित्रा नक्षत्रं भवति । चित्रं ँवा एतत्कर्म । **1(10)**

**T.B.3.8.1.2**

यदश्वमेधः समृद्ध्यै ॥ पुण्यनाम देवयजन–मद्ध्यवस्यति ।
पुण्यामेव तेन कीर्तिमभिजयति ॥
अपदाती–नृत्विजः समावहन्त्या सुब्रह्मण्यायाः ।
सुवर्गस्य लोकस्य समष्ट्यै ॥ केशश्मश्रु वपते ।
नखानि निकृन्तते । दतो धावते । स्नाति । अहतं ँवासः परिधत्ते ( ) ।

पाप्मनोऽपहत्यै । वाचं ँयत्वोपवसति । सुवर्गस्य लोकस्य गुप्त्यै ।

रात्रिं जागरयन्त आसते । सुवर्गस्य लोकस्य समष्ट्यै ॥ **2 (15)**

*(कर्म – धत्ते पञ्च च) (A1)*

**3.8.2** अनुवाकं 2 –ब्रह्मौदनाभिधानम्

**T.B.3.8.2.1**

चतुष्टय्य आपो भवन्ति ।

चतुश्शफो वा अश्वः प्राजापत्यः समृद्ध्यै ॥

ता दिग्भ्यः समाभृता भवन्ति । दिक्षु वा आपः ।

अन्नं ँवा आपः । अद्भ्यो वा अन्नं जायते । यदेवाद्भ्योऽन्नं जायते ।

तदवरुन्धे ॥ तासु ब्रह्मौदनं पचति । रेत एव तद्दधाति ॥ **3 (10)**

**T.B.3.8.2.2**

चतुश्शरावो भवति । दिक्ष्वेव प्रतितिष्ठति ॥ उभयतो रुक्मौ भवतः ।

उभयत एवास्मिन्–रुचं दधाति । उद्धरति शृतत्वाय ।

सर्पिष्वान् भवति मेद्ध्यत्वाय । चत्वार आर्.षेयाः प्राश्ञन्ति ।

दिशामेव ज्योतिषि जुहोति । चत्वारि हिरण्यानि ददाति ।

दिशामेव ज्योतीꣳष्य वरुन्धे ॥ **4 (10)**

**T.B.3.8.2.3**

यदाज्य–मुच्छिष्यते । तस्मिन्–रशनां न्युनत्ति । प्रजापतिर्वा ओदनः ।
रेत आज्यम् । यदाज्ये रशनां न्युनत्ति ।
प्रजापतिमेव रेतसा समर्द्धयति ॥
दर्भमयी रशना भवति ।
बहु वा एष कुचरो–ऽमेद्ध्यमुपगच्छति ।
यदश्वः । पवित्रं वै दर्भाः । **5 (10)**

**T.B.3.8.2.4**

यद्दर्भमयी रशना भवति । पुनात्येवैनम् । पूतमेनं मेद्ध्य–मालभते ॥
अश्वस्य वा आलब्धस्य महिमोद–क्रामत् । स महर्त्विजः प्राविशत् ।
तन्महर्त्विजां महर्त्विक्त्वम् । यन्महर्त्विजः प्राश्ञन्ति ।
महिमान–मेवास्मिन्–तद्दधति ॥
अश्वस्य वा आलब्धस्य रेत उदक्रामत् ।
तथ्सुवर्णꣳ हिरण्य–मभवत् ( ) । यथ्सुवर्णꣳ हिरण्यं ददाति ।
रेत एव तद्दधाति ॥ ओदने ददाति । रेतो वा ओदनः ।
रेतो हिरण्यम् । रेतसैवास्मिन् रेतो दधाति ॥ **6 (16)**

*(दधाति - रुन्धे - दर्भा - अभवथ् षट्च) (A2)*

### 3.8.3 अनुवाकं 3 -रशनयाऽश्वबन्धनम्

**T.B.3.8.3.1**

यो वै ब्रह्मणे देवेभ्यः प्रजापतये-ऽप्रति-प्रोच्याश्वं मेद्ध्यं बद्ध्नाति ।

आ देवताभ्यो वृश्च्यते । पापीयान्भवति । यः प्रतिप्रोच्य ।

न देवताभ्य आवृश्च्यते । वसीयान्भवति ॥ यदाह ।

ब्रह्मन्नश्वं मेद्ध्यं भन्थ्स्यामि देवेभ्यः प्रजापतये तेन राद्ध्यासमिति ।

ब्रह्म वै ब्रह्मा ।

ब्रह्मण एव देवेभ्यः प्रजापतये प्रतिप्रोच्याश्वं मेद्ध्यं बद्ध्नाति । **7 (10)**

**T.B.3.8.3.2**

न देवताभ्य आवृश्च्यते । वसीयान् भवति ॥

देवस्य त्वा सवितुः प्रसव इति रशना-मादत्ते प्रसूत्यै ।

अश्विनो-र्बाहुभ्या-मित्याह । अश्विनौ हि देवाना-मद्ध्वर्यू आस्ताम् ।

पूष्णो हस्ताभ्या-मित्याह यत्यै ॥

व्यृद्धं ँवा एतद्यज्ञस्य । यदयजुष्केण क्रियते ।

इमामगृभ्णन्-रशना-मृतस्ये-त्यधि वदति यजुष्कृत्यै ।

यज्ञस्य समृद्ध्यै ॥ 8 (10)

**T.B.3.8.3.3**

तदाहुः । द्वादशारत्नी रशना कर्तव्या(3) त्रयोदशारत्नी(3)रिति ।

ऋषभो वा एष ऋतूनाम् । यथ्सम्ँवथ्सरः ।

तस्य त्रयोदशो मासो विष्टपम् । ऋषभ एष यज्ञानाम् ।

यदश्वमेधः । यथा वा ऋषभस्य विष्टपम् । एवमेतस्य विष्टपम् ।

त्रयोदशमरत्निं रशनाया-मुपादधाति । 9 (10)

**T.B.3.8.3.4**

यथर्.षभस्य विष्टपं संस्करोति । तादृगेव तत् ॥

पूर्व आयुषि विदथेषु कव्येत्याह । आयुरेवास्मिन् दधाति ॥

तया देवाः सुतमाबभूवु-रित्याह । भूतिमेवोपावर्तते ॥

ऋतस्य सामन्थ् सरमारपन्तीत्याह । सत्यं ँवा ऋतम् ।

सत्येनैवैन मृतेनारभते ॥ अभिधा असीत्याह । 10 (10)

**T.B.3.8.3.5**

तस्मा-दश्वमेधयाजी सर्वाणि भूतान्यभि भवति । भुवन-मसीत्याह ।

भूमान-मेवोपैति । यन्ता-ऽसीत्याह । यन्तारमेवैनं करोति ।

धर्ताऽसीत्याह । धर्तारमेवैनं करोति । सोऽग्निं ँवैश्वानर-मित्याह ।

अग्ना-वेवैनं ँवैश्वानरे जुहोति । सप्रथसमित्याह । **11 (10)**

**<u>T.B.3.8.3.6</u>**

प्रजयैवैनं पशुभिः प्रथयति । स्वाहाकृत इत्याह । होम एवास्यैषः ।

पृथिव्या-मित्याह । अस्यामेवैनं प्रतिष्ठापयति ।

यन्ता राड्यन्ताऽसि यमनो धर्ताऽसि धरुण इत्याह ।

रूपमेवास्यै-तन्महिमानं ँव्याचष्टे ।

कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वेत्याह ।

आशिषमेवैतामाशास्ते ॥

स्वगा त्वा देवेभ्य इत्याह ( ) । देवेभ्य एवैनꣳ स्वगा करोति ।

स्वाहा त्वा प्रजापतय इत्याह । प्राजापत्यो वा अश्वः ।

यस्या एव देवताया आलभ्यते । तयैवैनꣳ समर्द्धयति ॥ **12 (15)**

*(बध्नाति – समृद्ध्या – उपदधा – त्यसीत्याह – सप्रथसमीत्याह – देवेभ्य इत्याह पञ्च च) (A3)*

**3.8.4** अनुवाकं 4 –अश्वस्य जलेऽवगाहनम्

**T.B.3.8.4.1**

यः पितुरनुजायाः पुत्रः । स पुरस्तान्नयति ।

यो मातुरनुजायाः पुत्रः । स पश्चान्नयति ।

विष्वञ्चमेवास्मात्-पाप्मानं ँविवृहतः ॥

यो अर्वन्तं जिघा॒ꣳसति तमभ्यमीति वरुण इति श्वानं

चतुरक्षं प्रसौति ।

परो मर्तः परः श्वेति शुनश्चतु-रक्षस्य प्रहन्ति ।

श्वेव वै पाप्मा भ्रातृव्यः । पाप्मान-मेवास्य भ्रातृव्य॒ꣳ हन्ति ॥

सैद्ध्रकं मुसलं भवति । **13 (10)**

**T.B.3.8.4.2**

कर्म कर्मैवास्मै साधयति ॥ पौꣳश्चलेयो हन्ति ।

पुꣳश्चल्वां ँवै देवाः शुचं न्यदधुः । शुचैवास्य शुच॒ꣳ हन्ति ॥

पाप्मा वा एतमीप्स-तीत्याहुः । योऽश्वमेधेन यजत इति ।

अश्वस्याधस्पदमुपास्यति । वज्री वा अश्वः प्राजापत्यः ।

वज्रेणैव पाप्मानं भ्रातृव्य-मवक्रामति ॥ दक्षिणा-ऽपप्लावयति । **14(10)**

**T.B.3.8.4.3**

पाप्मान-मेवास्मा-च्छमल-मपप्लावयति ॥ ऐषीक उदूहो भवति ।

आयुर्वा इषीकाः । आयुरे-वास्मिन् दधति । अमृतं ँवा इषीकाः ।

अमृतमे-वास्मिन् दधति ॥ वेतसशाखोपसंबद्धा भवति ।

अफ्सु-योनिर्वा अश्वः । अफ्सुजो वेतसः ।

स्वादेवैनं ँयोनेर्निर्मिमीते ( ) ॥ पुरस्तात्-प्रत्यञ्च-मभ्युदूहति ।

पुरस्ता-देवास्मिन् प्रतीच्य मृतं दधाति ॥

अहं च त्वं च वृत्रहन्निति ब्रह्मा यजमानस्य हस्तं गृह्णाति ।

ब्रह्मक्षत्रे एव संदधाति ।

अभि क्रत्वेन्द्र भूरध ज्मन्नित्य-ध्वर्यु-र्यजमानं

ँवाचयत्य-भिजित्यै ॥ **15 (15)**

*(भवति - प्लावयति - मिमीते पञ्च च) (A4)*

**3.8.5** अनुवाकं 5 -अश्वस्य प्रोक्षणं महर्त्विजाम्

**T.B.3.8.5.1**

चत्वार ऋत्विजः समुक्षन्ति ।

आभ्य एवैनं चतसृभ्यो दिग्भ्यो-ऽभिसमीरयन्ति ॥

शतेन राजपुत्रैः सहाद्ध्वर्युः ।

पुरस्तात्–प्रत्यङ्तिष्ठन् प्रोक्षति । अनेनाश्वेन मेद्ध्येनेष्ट्वा ।

अय७ राजा वृत्रं ँवद्ध्यादिति । राज्यं ँवा अद्ध्वर्युः ।

क्षत्र७ राजपुत्रः । राज्येनै–वास्मिन् क्षत्रं दधाति ॥

शतेना–राजभिरुग्रैः सह ब्रह्मा । **16 (10)**

**T.B.3.8.5.2**

दक्षिणत उदङ्तिष्ठन् प्रोक्षति । अनेनाश्वेन मेद्ध्येनेष्ट्वा ।

अय७ राजा–ऽप्रतिधृष्यो–ऽस्त्विति । बलं ँवै ब्रह्मा ।

बलमराजोग्रः । बलेनै–वास्मिन् बलं दधाति ॥

शतेन सूतग्रामणिभिः सह होता । पश्चात्–प्राङ्तिष्ठन् प्रोक्षति ।

अनेनाश्वेन मेद्ध्येनेष्ट्वा । अय७ राजाऽस्यै विशः । **17 (10)**

**T.B.3.8.5.3**

बहुग्वै बह्वश्वायै बह्वजाविकायै । बहुव्रीहियवायै बहुमाषतिलायै ।

बहुहिरण्यायै बहुहस्तिकायै । बहुदासपूरुषायै रयिमत्यै पुष्टिमत्यै ।

बहुरायस्पोषायै राजाऽस्त्विति । भूमा वै होता । भूमा सूतग्रामण्यः ।

भूम्नैवास्मिन् भूमानं दधाति ॥

शतेन क्षत्त-संग्रहीतृभिः सहोद्गाता ।

उत्तरतो दक्षिणा तिष्ठन् प्रोक्षति । **18 (10)**

**T.B.3.8.5.4**

अनेनाश्वेन मेद्ध्ये नेष्ट्वा । अयꣳ राजा सर्वमायुरेत्विति ।

आयुर्वा उद्गाता । आयुः क्षत्त-संग्रहीतारः ।

आयुषै-वास्मिन्नायु-र्दधाति ॥ शतꣳ शतं भवन्ति ।

शतायुः पुरुषः शतेन्द्रियः ।

आयुष्येवेन्द्रिये प्रतितिष्ठति ॥ चतुः शता भवन्ति ।

चतस्रो दिशः ( ) । दिक्ष्वेव प्रतितिष्ठति ॥ **19 (11)**

*(ब्रह्मा – विश – उक्षति – दिश एकं च) (A5)*

**3.8.6** अनुवाकं 6 –भूमौ पततां बिन्दूनामभिमन्त्रणम्

**T.B.3.8.6.1**

यथा वै हविषो गृहीतस्य स्कन्दति । एवँ वा एतदश्वस्य स्कन्दति ।

यन्निक्तमना-लब्ध-मुथ्सृजन्ति । यथ्स्तोक्या अन्वाह ।

सर्वहुत-मेवैनं करोत्य-स्कन्दाय । अस्कन्नꣳ हि तत् ।

यद्धुतस्य स्कन्दति ॥ सहस्र-मन्वाह ।

सहस्र संमितः सुवर्गो लोकः ।

सुवर्गस्य लोकस्या–भिजित्यै ॥ 20 (10)

**T.B.3.8.6.2**

यत्परिमिता अनुब्रूयात् । परिमितमवरुन्धीत । अपरिमिता अन्वाह ।

अपरिमितः सुवर्गो लोकः । सुवर्गस्य लोकस्य समष्ट्यै ॥

स्तोक्या जुहोति । या एव वर्ष्या आपः । ता अवरुन्धे ॥

अस्यां जुहोति । इयं ँवा अग्निर्वैश्वानरः । 21 (10)

**T.B.3.8.6.3**

अस्यामेवैनाः प्रतिष्ठापयति ॥ उवाच ह प्रजापतिः ।

स्तोक्यासु वा अहमश्वमेध७ँ स७ँस्थापयामि ।

तेन ततः स७ँस्थितेन चरामीति ॥ अग्नये स्वाहेत्याह ।

अग्नय एवैनं जुहोति ॥ सोमाय स्वाहेत्याह । सोमायैवैनं जुहोति ।

सवित्रे स्वाहेत्याह । सवित्र एवैनं जुहोति । 22 (10)

**T.B.3.8.6.4**

सरस्वत्यै स्वाहेत्याह । सरस्वत्या एवैनं जुहोति । पूष्णे स्वाहेत्याह ।

पूष्ण एवैनं जुहोति । बृहस्पतये स्वाहेत्याह ।

बृहस्पतय एवैनं जुहोति । अपां मोदाय स्वाहेत्याह ।

अ॒द्भ्य ए॒वैनं॑ जुहोति । वा॒य॒वे॒ स्वाहेत्या॑ह ।

वा॒य॑व ए॒वैनं॑ जुहोति । **23 (10)**

**T.B.3.8.6.5**

मि॒त्रा॒य स्वाहेत्या॑ह । मि॒त्रा॒यै॒वैनं॑ जुहोति । वरु॑णा॒य स्वाहेत्या॑ह ।

वरु॑णा॒यै॒वैनं॑ जुहोति ॥ ए॒ताभ्य॑ ए॒वैनं॑ दे॒वता॑भ्यो जुहोति ॥

दश॑ दश॑ सं॒पादं॑ जुहोति । दशा॑क्षरा वि॒राट् । अन्नं॑ ँवि॒राट् ।

वि॒रा॒जै–वान्ना॒द्यम॑वरुन्धे ॥ प्र वा ए॒षो॑–ऽस्माल्लो॒का–च्च्य॑वते ( ) ।

यः परा॑ची॒राहु॑तीर्जु॒होति॑ । पुनः॑ पुनर॒भ्याव॑र्तं जुहोति ।

अ॒स्मि॒न्ने॒व लो॒के प्रति॑तिष्ठति ॥

ए॒ताꣳ ह॒ वाव सो॑ऽश्वमे॒ध॒स्य॒ सꣳस्थि॑तिं मु॒वा॒चा–स्क॑न्दाय ।

अस्क॑न्न॒ꣳ॒ हि तत् ।

य॒द्य॒ज्ञस्य॒ सꣳस्थि॑तस्य॒ स्कन्द॑ति ॥ **24 (16)**

*(अ॒भि॒जि॑त्यै – वै॒श्वा॒न॒रः – स॑वि॒त्र ए॒वैन॑म् जुहोति – वा॒य॑व ए॒वैन॑म् जुहोति – च्यव॒ते॑ षट्च॑) (A6)*

**3.8.7** अनुवाकं 7 –अथाध्वर्युप्रोक्षणम्

**T.B.3.8.7.1**

प्रजापतये त्वा जुष्टं प्रोक्षामीति पुरस्तात्–प्रत्यङ्तिष्ठन् प्रोक्षति ।

प्रजापतिर्वै देवाना–मन्नादो वीर्यावान् ।

अन्नाद्य–मेवास्मिन् वीर्यं दधाति ।

तस्मादश्वः पशूना–मन्नादो वीर्यावत्तमः ॥

इन्द्राग्निभ्यां त्वेति दक्षिणतः ।

इन्द्राग्नी वै देवानामोजिष्ठौ बलिष्ठौ । ओज एवास्मिन् बलं दधाति ।

तस्मादश्वः पशूनामोजिष्ठो बलिष्ठः ॥ वायवे त्वेति पश्चात् ।

वायुर्वै देवानामाशुः सारसारितमः । **25 (10)**

**T.B.3.8.7.2**

जवमेवास्मिन्दधाति । तस्मादश्वः पशूनामाशुः सारसारितमः ॥

विश्वेभ्यस्त्वा देवेभ्य इत्युत्तरतः । विश्वे वै देवा देवानां यशस्वितमाः ।

यश एवास्मिन्दधाति । तस्मादश्वः पशूनां यशस्वितमः ॥

देवेभ्य–स्त्वेत्यधस्तात् । देवा वै देवाना–मपचिततमाः ।

अपचिति-मेवास्मि-न्दधाति ।

तस्मादश्वः पशूना-मपचिततमः ॥ **26 (10)**

**T.B.3.8.7.3**

सर्वेभ्यस्त्वा देवेभ्य इत्युपरिष्टात् । सर्वे वै देवास्त्विषिमन्तो हरस्विनः ।

त्विषिमे-वास्मिन्. हरो दधाति ।

तस्मादश्वः पशूनां त्विषिमान्. हरस्वितमः ॥

दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेत्याह ।

एभ्य एवैनं ँल्लोकेभ्यः प्रोक्षति ॥

सते त्वाऽसते त्वा-ऽद्भ्यस्त्वौ-षधीभ्यस्त्वा विश्वेभ्यस्त्वा

भूतेभ्य इत्याह ।

तस्मादश्वमेधयाजिनꣳ सर्वाणि भूतान्युप जीवन्ति ॥

ब्रह्मवादिनो वदन्ति । यत्प्राजापत्योऽश्वः ( ) ।

अथ कस्मादेन-मन्याभ्यो देवताभ्योऽपि प्रोक्षतीति ।

अश्वे वै सर्वा देवता अन्वायत्ताः ।

तं ँयद्विश्वेभ्यस्त्वा भूतेभ्य इति प्रोक्षति ।

देवता एवास्मिन्-नन्वायातयति ।

तस्मादश्वे सर्वा देवता अन्वायत्ताः ॥ **27 (15)**

*(सारसारितमो – ऽपचिततमः – प्राजापत्योऽश्व पञ्च च) (A7)*

**3.8.8** <u>अनुवाकं 8 –अश्वचरितानामश्वरूपाणां च होमाः</u>

**<u>T.B.3.8.8.1</u>**

यथा वै हविषो गृहीतस्य स्कन्दति । एवँ वा एतदश्वस्य स्कन्दति ।

यत्प्रोक्षित-मनालब्ध-मुथ्सृजन्ति । यदश्व-चरितानि जुहोति ।

सर्वहुत-मेवैनं करोत्य-स्कन्दाय । अस्कन्नꣳ हि तत् ।

यद्धुतस्य स्कन्दति ॥ ईंकाराय स्वाहें कृताय स्वाहेत्याह ।

एतानि वा अश्वचरितानि । चरितैरेवैनꣳ समर्द्धयति ॥ **28 (10)**

**<u>T.B.3.8.8.2</u>**

तदाहुः । अनाहुतयो वा अश्वचरितानि । नैता होतव्या इति ।

अथो खल्वाहुः । होतव्या एव । अत्र वावैवँ विद्वानश्वमेधꣳ

सꣳस्थापयति । यदश्व-चरितानि जुहोति । तस्मा-द्धोतव्या इति ॥

बहिर्द्धा वा एनमेतदायतनाद्-दधाति ।

भ्रातृव्यमस्मै जनयति । **29 (10)**

**T.B.3.8.8.3**

यस्या नायतने-ऽन्यत्राग्ने-राहुतीर् जुहोति ।
सावित्रिया इष्ट्याः पुरस्ताथ्स्विष्ट कृतः ।
आहवनीये-ऽश्वचरितानि जुहोति ।
आयतन एवास्याहुतीर् जुहोति । नास्मै भ्रातृव्यं जनयति ॥ तदाहुः ।
यज्ञमुखे यज्ञमुखे होतव्याः । यज्ञस्य क्लृप्त्यै ।
सुवर्गस्य लोकस्या-नुख्यात्या इति ॥ अथो खल्वाहुः । **30 (10)**

**T.B.3.8.8.4**

यद्यज्ञमुखे यज्ञमुखे जुहुयात् । पशुभि-र्यजमानँ व्यर्द्धयेत् ।
अव सुवर्गाल्लोका-त्पद्येत । पापीयान् थ्स्यादिति ।
सकृदेव होतव्याः । न यजमानं पशुभि-र्व्यर्द्धयति ।
अभि सुवर्गँ लोकं जयति । न पापीयान् भवति ॥
अष्टाचत्वारिꣳशतमश्व रूपाणि जुहोति ।
अष्टाचत्वारिꣳशदक्षरा जगती ( ) । जागतोऽश्वः प्राजापत्यः समृद्ध्यै ॥
एकमतिरिक्तं जुहोति । तस्मादेकः प्रजास्वर्द्धुकः ॥ **31 (13)**

*(अर्द्धयति - जनयति - खल्वाहुर् - जगती त्रीणि च) (A8)*

**3.8.9** अनुवाकं 9 –अश्वस्य नाम्नामभिवाचनं, उत्सर्गश्च

**T.B.3.8.9.1**

विभूर्मात्रा प्रभूः पित्रेत्याह । इयं ँवै माता । असौ पिता ।

आभ्यामेवैनं परिददाति ॥ अश्वोऽसि हयोऽसीत्याह ।

शास्त्येवैनमेतत् । तस्माच्छिष्टाः प्रजा जायन्ते ॥ अत्योऽसीत्याह ।

तस्मादश्वः सर्वान् पशूनत्येऽति ।

तस्मादश्वः सर्वेषां पशूना७ श्रैष्ठ्यं गच्छति ॥ **32 (10)**

**T.B.3.8.9.2**

प्र यशः श्रैष्ठ्यमाप्नोति । य एवं ँवेद ॥

नरोऽस्यर्वाऽसि सप्तिरसि वाज्यसीत्याह ।

रूपमेवास्यैतन्महिमानं ँव्याचष्टे ॥

ययुर्नामा–ऽसीत्याह । एतद्वा अश्वस्य प्रियं नामधेयम् ।

प्रियेणैवैनं नामधेयेनाभिवदति । तस्मादप्यामित्रौ संगत्य ।

नाम्ना चेद्ध्वयेते । मित्रमेव भवतः ॥ **33 (10)**

**T.B.3.8.9.3**

आदित्यानां पत्वा–ऽन्विहीत्याह । आदित्यानेवैनं गमयति ॥

अग्नये स्वाहा स्वाहेन्द्राग्निभ्यामिति पूर्वहोमा–ञ्जुहोति ।

पूर्व एव द्विषन्तं भ्रातृव्य–मतिक्रामति ॥

भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वेत्युथ्सृजति सर्वत्वाय ॥

देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं गोपायतेत्याह ।

शतं ँवै तल्प्या राजपुत्रा देवा आशापालाः । तेभ्य एवैनं परिददाति ॥

ईश्वरो वा अश्वः प्रमुक्तः परां परावतं गन्तोः ।

इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः

स्वाहेति चतृषु पथ्सु जुहोति । **34 (10)**

**T.B.3.8.9.4**

एता वा अश्वस्य बन्धनम् । ताभिरेवैनं बद्ध्नाति ।

तस्मादश्वः प्रमुक्तो बन्धन–मागच्छति ।

तस्मादश्वः प्रमुक्तो बन्धनं न जहाति ॥

राष्ट्रं ँवा अश्वमेधः । राष्ट्रे खलु वा एते व्यायच्छन्ते ।

येऽश्वं मेद्ध्य॑ᳪ रक्षन्ति । तेषां ँय उदृचं गच्छन्ति ।

राष्ट्रादेव ते राष्ट्रं गच्छन्ति ।

अथ य उदृचं न गच्छन्ति ( ) । **35 (10)**

**T.B.3.8.9.5**

राष्ट्रादेव ते व्यवच्छिद्यन्ते । परा वा एष सिच्यते ।

यो–ऽबलो–ऽश्वमेधेन यजते । यदमित्रा अश्वं ँविन्देरन्न् ।

हन्येतास्य यज्ञः । चतुश्शता रक्षन्ति । यज्ञस्याघाताय ॥

अथान्य–मानीय प्रोक्षेयुः । सैव ततः प्रायश्चित्तिः ॥ **36 (9)**

*(गच्छति – भवतः – पथ्सु जुहोति – न गच्छन्ति –*

*+नव च) (A9)*

**3.8.10** अनुवाकं 10 –दीक्षाभिधानम् तत्र वैश्वदेवहोमः

**T.B.3.8.10.1**

प्रजापति–रकामयताश्वमेधेन यजेयेति । स तपोऽतप्यत ।

तस्य तेपानस्य । सप्तात्मनो देवता उदक्रामन्न् ।

सा दीक्षा–ऽभवत् । स एतानि वैश्वदेवान्यपश्यत् । तान्य जुहोत् ।

तैर्वै स दीक्षामवारुन्ध । यद्वैश्व देवानि जुहोति ।

दीक्षामेव–तैर्यजमानो–ऽवरुन्धे ॥ **37 (10)**

**T.B.3.8.10.2**

सप्त जुहोति । सप्त हि ता देवता उदक्रामन्न् ॥ अन्वहं जुहोति ।

अन्वहमेव दीक्षामवरुन्धे ॥ त्रीणि वैश्वदेवानि जुहोति ।

चत्वार्यौद्ग्रहणानि । सप्त संपद्यन्ते । सप्त वै शीर्.षण्याः प्राणाः ।

प्राणा दीक्षा । प्राणैरेव प्राणान्दीक्षामवरुन्धे ॥ **38 (10)**

**T.B.3.8.10.3**

एकवि(गुं)शतिं(गुं) वैश्वदेवानि जुहोति । एकवि(गुं)शतिर्वै देवलोकाः ।

द्वादश मासाः पञ्चर्तवः । त्रय इमे लोकाः ।

असावादित्य एकवि(गुं)शः ॥ एष सुवर्गो लोकः । तद्दैव्यं क्षत्त्रम् ।

सा श्रीः । तद्ब्रद्ध्नस्य विष्टपम् । तथ्स्वाराज्य-मुच्यते ॥ **39 (10)**

**T.B.3.8.10.4**

त्रि(गुं)शतमौद्ग्रहणानि जुहोति । त्रि(गुं)शदक्षरा विराट् ।

अन्नं(गुं) विराट् । विराजैवान्नाद्यमवरुन्धे ॥

त्रेधा विभज्य देवतां जुहोति । त्र्यावृतो वै देवाः ।

त्र्यावृत इमे लोकाः । एषां(गुं) लोकानामाप्त्यै ।

एषां(गुं) लोकानां क्लृप्त्यै ॥

अप वा एतस्मात्प्राणाः क्रामन्ति । **40 (10)**

**T.B.3.8.10.5**

यो दीक्षामति-रेचयति । सप्ताहं प्रचरन्ति ।

सप्त वै शीर्.षण्याः प्राणाः । प्राणा दीक्षा ।

प्राणैरेव प्राणान्दीक्षामवरुन्धे ॥ पूर्णाहुति-मुत्तमां जुहोति ।
सर्वं ँवै पूर्णाहुतिः । सर्वमेवाप्नोति । अथो इयं ँवै पूर्णाहुतिः ।
अस्यामेव प्रतितिष्ठति ( ) ॥ **41 (10)** *(रुन्धे – प्राणान् दीक्षामवरुन्ध – उच्यते – क्रामन्ति – तिष्ठति) (A10)*

**3.8.11** अनुवाकं 11 –वैश्वदेवहोममन्त्रव्याख्यानम्

**T.B.3.8.11.1**

प्रजापति-रश्वमेध-मसृजत । तꣳ सृष्टं न किञ्चनोदयच्छत् ।
तं ँवैश्वदेवान्ये-वोदयच्छन्न् । यद्वैश्वदेवानि जुहोति ।
यज्ञस्योद्यत्यै ॥ स्वाहा-ऽऽधिमाधीताय स्वाहा ।
स्वाहा-ऽऽधीतं मनसे स्वाहा । स्वाहा मनः प्रजापतये स्वाहा ।
काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहेति प्राजापत्ये मुख्ये भवतः ।
प्रजापति-मुखाभिरेवैनं देवताभिरुद्यच्छते ॥ **42 (10)**

**T.B.3.8.11.2**

अदित्यै स्वाहाऽदित्यै मह्यै स्वाहाऽदित्यै सुमृडीकायै स्वाहेत्याह ।
इयं ँवा अदितिः । अस्या एवैनं प्रतिष्ठायोद्यच्छते ॥
सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै

पावकायै स्वाहेत्याह ।

वाग्वै सरस्वती । वाचैवैनमुद्यच्छते ॥

पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहेत्याह ।

पशवो वै पूषा । पशुभिरेवैन–मुद्यच्छते ॥

त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहेत्याह ( ) ।

त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृत् । रूपमेव पशुषु दधाति ।

अथो रूपैरेवैन–मुद्यच्छते ॥

विष्णवे स्वाहा विष्णवे निखुर्यपाय स्वाहा विष्णवे

निभूयपाय स्वाहेत्याह ।

यज्ञो वै विष्णुः । यज्ञायैवैन–मुद्यच्छते ॥

पूर्णाहुति–मुत्तमां जुहोति । प्रत्युत्तब्ध्यै सयत्वाय ॥ **43 (18)**

*(यच्छते – पुरुरूपाय स्वाहेत्याहाष्टौ च) (A11)*

## 3.8.12 अनुवाकं 12 –अश्वसंचरणवथ्सरे प्रतिदिनं देवयजनदेशे कर्तव्यमिष्टित्रयमभिधीयते

**T.B.3.8.12.1**

सावित्र–मष्टाकपालं प्रातर्निर्वपति ।
अष्टाक्षरा गायत्री । गायत्रं प्रातस्सवनं ।
प्रातस्सवना देवैनं गायत्रिया श्छन्दसोऽधि निर्मिमीते ।
अथो प्रातस्सवनमेव तेनाप्नोति । गायत्रीं छन्दः ॥
सवित्रे प्रसवित्र एकादश–कपालं मद्ध्यन्दिने । एकादशाक्षरा त्रिष्टुप् ।
त्रैष्टुभं माद्ध्यन्दिनꣳ सवनम् ।
माद्ध्यन्दिना–देवैनꣳ सवनात्त्रिष्टुभः–छन्दसोऽधि निर्मिमीते । **44 (10)**

**T.B.3.8.12.2**

अथो माद्ध्यन्दिनमेव सवनं तेनाप्नोति । त्रिष्टुभं छन्दः ॥
सवित्र आसवित्रे द्वादश–कपाल–मपराह्णे । द्वादशाक्षरा जगती ।
जागतं तृतीय सवनम् ।
तृतीय सवनादेवैनं जगत्या श्छन्दसोऽधि निर्मिमीते ।
अथो तृतीय सवनमेव तेनाप्नोति ।
जगतीं छन्दः ॥ ईश्वरो वा अश्वः प्रमुक्तः परां परावतं गन्तोः ।

इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः
स्वाहेति चतस्र आहुती-र्जुहोति ( ) । **45 (10)**

**T.B.3.8.12.3**

चतस्रो दिशः । दिग्भिरेवैनं परिगृह्णाति ॥ आश्वत्थो व्रजो भवति ।
प्रजापति-र्देवेभ्यो निलायत । अश्वो रूपं कृत्वा ।
सोऽश्वत्थे सम्ँवथ्सर-मतिष्ठत् । तदश्वत्थस्या-श्वत्थत्वम् ।
यदाश्वत्थो व्रजो भवति । स्व एवैनं ँयोनौ प्रतिष्ठापयति ॥ **46 (9)**

*(त्रिष्टुभ श्छन्दसोऽधि निर्मिमीते - जुहोति - +नव च) (A12)*

**3.8.13 अनुवाकं 13 -संवथ्सरार्द्ध्वमुख्यस्याग्रेरूपस्थानम्**

**T.B.3.8.13.1**

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायता-मित्याह ।
ब्राह्मण एव ब्रह्मवर्चसं दधाति ।
तस्मात्पुरा ब्राह्मणो ब्रह्मवर्चस्य जायत ॥
आऽस्मिन् राष्ट्रे राजन्य इषव्यः शूरो महारथो जायता-मित्याह ।
राजन्य एव शौर्यं महिमानं दधाति ।
तस्मात्पुरा राजन्य इषव्यः शूरो महारथो-ऽजायत ॥

दोग्ध्री धेनुरित्याह । धेन्वामेव पयो दधाति ।

तस्मात्पुरा दोग्ध्री धेनुरजायत । वोढाऽनड्वा-नित्याह । **47 (10)**

**T.B.3.8.13.2**

अनडुह्येव वीर्यं दधाति । तस्मात्पुरा वोढाऽनड्वानजायत ।

आशुः सप्तिरित्याह । अश्व एव जवं दधाति ।

तस्मात्पुरा-ऽऽशुरश्वो-ऽजायत । पुरंधिर्योषेत्याह ।

योषित्येव रूपं दधाति । तस्माथ्स्त्री युवतिः प्रिया भावुका ॥

जिष्णू रथेष्ठा इत्याह । आ ह वै तत्र जिष्णू रथेष्ठा जायते । **48 (10)**

**T.B.3.8.13.3**

यत्रैतेन यज्ञेन यजन्ते ॥ सभेयो युवेत्याह । यो वै पूर्ववयसी ।

स सभेयो युवा । तस्माद्युवा पुमान् प्रियो भावुकः ॥

आऽस्य यजमानस्य वीरो जायता-मित्याह ।

आ ह वै तत्र यजमानस्य वीरो जायते ।

यत्रैतेन यज्ञेन यजन्ते ॥ निकामेनिकामे नः पर्जन्यो वर्.षत्वित्याह ।

निकामेनिकामे ह वै तत्र पर्जन्यो वर्.षति ( ) ।

यत्रैतेन यज्ञेन यजन्ते ॥ फलिन्यो न ओषधयः पच्यन्ता-मित्याह ।

फलिन्यो ह वै तत्रौषधयः पच्यन्ते । यत्रैतेन यज्ञेन यजन्ते ।

योगक्षेमो नः कल्पता-मित्याह ।

कल्पते ह वै तत्र प्रजाभ्यो योगक्षेमः ।

यत्रैतेन यज्ञेन यजन्ते ॥ **49 (17)**

*(अनड्वानित्याह – जायते – वर्.षति सप्त च) (A13)*

**3.8.14** अनुवाकं 14 –अन्नहोमाः. त्रिरात्ररूपस्याश्वमेधस्य प्रथमदिनरात्रौ

**T.B.3.8.14.1**

प्रजापति-र्देवेभ्यो यज्ञान् व्यादिशत् । स आत्म-न्नश्वमेधमधत्त ।

तं देवा अब्रुवन्न् । एष वाव यज्ञः । यदश्वमेधः ।

अप्येव नोऽन्नास्त्विति । तेभ्य एतानन्नहोमान् प्रायच्छत् ।

तानजुहोत् । तैर्वै स देवान प्रीणात् । यदन्न-होमाञ्जुहोति । **50 (10)**

**T.B.3.8.14.2**

देवानेव तैर्यजमानः प्रीणाति ॥ आज्येन जुहोति ।

अग्नेर्वा एतद्रूपम् । यदाज्यम् । यदाज्येन जुहोति ।

अग्निमेव तत्प्रीणाति ॥ मधुना जुहोति ।

महत्यै वा एतद्देवतायै रूपम् । यन्मधु । यन्मधुना जुहोति । **51 (10)**

**T.B.3.8.14.3**

महतीमेव तद्देवतां प्रीणाति । तण्डुलै-र्जुहोति ।

वसूनां ँवा एतद्रूपम् । यत्तण्डुलाः । यत्तण्डुलै-र्जुहोति ।

वसूनेव तत्प्रीणाति । पृथुकै र्जुहोति (र्जुहोति) ।

रुद्राणां ँवा एतद्रूपम् । यत्पृथुकाः । यत्पृथुकै-र्जुहोति । **52 (10)**

**T.B.3.8.14.4**

रुद्रानेव तत्प्रीणाति । लाजैर्जुहोति । आदित्यानां ँवा एतद्रूपम् ।

यल्लाजाः । यल्लाजै-र्जुहोति । आदित्यानेव तत्प्रीणाति ।

करम्बै-र्जुहोति । विश्वेषां ँवा एतद्देवाना ँ रूपम् । यत्करम्बाः ।

यत्करम्बै-र्जुहोति । **53 (10)**

**T.B.3.8.14.5**

विश्वानेव तद्देवान् प्रीणाति । धानाभि-र्जुहोति ।

नक्षत्राणां ँवा एतद्रूपम् । यद्धानाः । यद्धानाभि-र्जुहोति ।

नक्षत्राण्येव तत्प्रीणाति । सक्तुभि-र्जुहोति । प्रजापतेर्वा एतद्रूपम् ।

यथ्सक्तवः । यथ्सक्तुभि-र्जुहोति । **54 (10)**

**T.B.3.8.14.6**

प्रजापतिमेव तत्प्रीणाति । मसूस्यैर्जुहोति ।

सर्वासां ँवा एतद्देवताना७ं रूपम् । यन्मसूस्यानि ।

यन्मसूस्यै-र्जुहोति । सर्वा एव तद्देवताः प्रीणाति ।

प्रियङ्गुतण्डुलै-र्जुहोति । प्रियाङ्गा ह वै नामैते ।

एतैर्वै देवा अश्वस्याङ्गानि समदधुः । यत्प्रियङ्गुतण्डुलै-र्जुहोति ( ) ।

अश्वस्यैवाङ्गानि संदधाति ॥ दशान्नानि जुहोति । दशाक्षरा विराट् ।

विराट्-कृथ्स्नस्या-न्नाद्यस्या-वरुद्ध्यै ॥ **55 (14)**

*(जुहोति - मधुना जुहोति - पृथुकैर्जुहोति - करम्बैर्जुहोति - सक्तुभिर्जुहोति - प्रियङ्गुतण्डुलैर्जुहोति चत्वारि च) (A14)*

Special Korvai

(अन्नहोमानाज्येनाग्नेर्मधुना तण्डुलैः पृथुकैर्लाजैः करम्बैर्द्धानाभिः सक्तुभिर्मसूस्यैः प्रियङ्गुतण्डुलैर् दशान्नानि द्वादश)

**3.8.15** अनुवाकं 15 –तत्प्रकारविशेष

**T.B.3.8.15.1**

प्रजापति–रश्वमेधमसृजत । त९ँ सृष्ट९ँ रक्षा९ँस्य जिघा९ँसन् ।

स एतान् प्रजापतिर्नक्त९ँ होमान–पश्यत् । तान जुहोत् ।

तैर्वै स यज्ञाद् रक्षा९ँस्यपाहन् । यन्नक्त९ँ होमाञ्जुहोति ।

यज्ञादेव तैर्यजमानो रक्षा९ँस्यपहन्ति ॥ आज्येन जुहोति ।

वज्रो वा आज्यम् । वज्रेणैव यज्ञाद् रक्षा९ँस्यपहन्ति ॥ **56 (10)**

**T.B.3.8.15.2**

आज्यस्य प्रतिपदं करोति । प्राणो वा आज्यम् ।

मुखत एवास्य प्राणं दधाति ॥ अन्नहोमाञ्जुहोति ।

शरीरवदेवावरुन्धे ॥ व्यत्यासं जुहोति । उभयस्या वरुद्ध्यै ॥

नक्तं जुहोति । रक्षसामपहत्यै ॥ आज्येनान् ततो जुहोति । **57 (10)**

**T.B.3.8.15.3**

प्राणो वा आज्यम् । उभयत एवास्य प्राणं दधाति ।

पुरस्ता–च्चोपरिष्टाच्च ॥ एकस्मै स्वाहेत्याह ।

अस्मिन्नेव लोके प्रतितिष्ठति । द्वाभ्या९ँ स्वाहेत्याह ।

अमुष्मिन्नेव लोके प्रतितिष्ठति । उभयोरेव लोकयोः प्रतितिष्ठति ।

अस्मिꣳश्चा-मुष्मिꣳश्च ॥ शताय स्वाहेत्याह ( ) ।
शतायुर्वै पुरुषः शतवीर्यः । आयुरेव वीर्यमवरुन्धे ।
सहस्राय स्वाहेत्याह । आयुर्वै सहस्रम् । आयुरेवा-वरुन्धे ॥
सर्वस्मै स्वाहेत्याह । अपरिमितमेवा वरुन्धे ॥ **58 (17)**

*(एव यजद् रक्षाꣳस्यपहन् - त्यन्ततो जुहोति - शताय स्वाहेत्याह सप्त च) (A15)*

**3.8.16** अनुवाकं 16 -विवरणमेतयोः

**T.B.3.8.16.1**

प्रजापतिं ँवा एष ईफ्सतीत्याहुः । योऽश्वमेधेन यजत इति ।
अथो आहुः । सर्वाणि भूतानीति ॥ एकस्मै स्वाहेत्याह ।
प्रजापतिर्वा एकः । तमेवाप्नोति ॥
एकस्मै स्वाहा द्वाभ्याꣳ स्वाहेत्यभि-पूर्वमाहुती-र्जुहोति ।
अभिपूर्वमेव सुवर्गं ँलोकमेति ॥ एकोत्तरं जुहोति । **59 (10)**

**T.B.3.8.16.2**

एकवदेव सुवर्गं ँलोकमेति ॥ सन्ततं जुहोति ।
सुवर्गस्य लोकस्य सन्तत्यै ॥ शताय स्वाहेत्याह ।

शतायुर्वै पुरुषः शतवीर्यः । आयुरेव वीर्यमवरुन्धे ।

सहस्राय स्वाहेत्याह । आयुर्वै सहस्रम् । आयुरेवा वरुन्धे ॥

अयुताय स्वाहा नियुताय स्वाहा प्रयुताय स्वाहेत्याह । **60 (10)**

**T.B.3.8.16.3**

त्रय इमे लोकाः । इमानेव लोकानवरुन्धे ॥ अर्बुदाय स्वाहेत्याह ।

वाग्वा अर्बुदम् । वाचमेवा वरुन्धे ॥ न्यर्बुदाय स्वाहेत्याह ।

यो वै वाचो भूमा । तन्न्यर्बुदम् ।

वाच एव भूमानमवरुन्धे ॥

समुद्राय स्वाहेत्याह । **61 (10)**

**T.B.3.8.16.4**

समुद्रमेवाप्नोति । मद्ध्याय स्वाहेत्याह । मद्ध्यमेवाप्नोति ।

अन्ताय स्वाहेत्याह । अन्तमे–वाप्नोति । परार्द्धाय स्वाहेत्याह ।

परार्द्धमेवाप्नोति ॥ उषसे स्वाहा व्युष्ट्यै स्वाहेत्याह । रात्रिर्वा उषाः ।

अहर्व्युष्टिः ( ) । अहोरात्रे एवावरुन्धे ।

अथो अहोरात्रयोरेव प्रतितिष्ठति ॥

ता यदुभयीर्दिवा वा नक्तं ँवा जुहुयात् । अहोरात्रे मोहयेत् ।

उषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते

स्वाहेत्यनुदिते जुहोति ।

उदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहेत्युदिते जुहोति ।

अहोरात्रयो-रव्यतिमोहाय ॥ **62 (17)**

*(एकोत्तरम् जुहोति - प्रयुताय स्वाहेत्याह - समुद्राय स्वाहेत्याहाहर् - व्युष्टिः सप्त च) (A16)*

**3.8.17** अनुवाकं 17 -सप्तमकाण्डगतान्नहोमानुवाका व्याख्यायन्ते

**T.B.3.8.17.1**

विभूर्मात्रा प्रभूः पित्रेत्यश्व-नामानि जुहोति ।

उभयोरेवैनं ँल्लोकयो-र्नामधेयं गमयति ॥

आयनाय स्वाहा प्रायणाय स्वाहेत्युद्-द्रावाञ्जुहोति ।

सर्वमेवैन-मस्कन्नꣳ सुवर्गं ँल्लोकं गमयति ॥

अग्नये स्वाहा सोमाय स्वाहेति पूर्वहोमा-ञ्जुहोति ।

पूर्व एव द्विषन्तं भ्रातृव्य-मतिक्रामति ॥

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्याह । यथा यजुरेवैतत् ॥

अग्नये स्वाहा सोमाय स्वाहेति पूर्वदीक्षा जुहोति ।
पूर्व एव द्विषन्तं भ्रातृव्य-मतिक्रामति ॥ **63 (10)**

**T.B.3.8.17.2**

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्ये-कवि॒ꣳशिनीं दीक्षां जुहोति ।
एकवि॒ꣳशतिर्वै देवलोकाः । द्वादश मासाः पञ्चर्तवः ।
त्रय इमे लोकाः । असावादित्य एकवि॒ꣳशः । एष सुवर्गो लोकः ।
सुवर्गस्य लोकस्य समष्ट्यै ॥
भुवो देवानां कर्मणेत्यृतु-दीक्षा जुहोति ।
ऋतूने-वास्मै कल्पयति ॥
अग्नये स्वाहा वायवे स्वाहेति जुहोत्य-नन्तरित्यै ॥ **64 (10)**

**T.B.3.8.17.3**

अर्वाङ्यज्ञः संक्रामत्वि-त्याप्ती-र्जुहोति । सुवर्गस्य लोकस्याप्त्यै ॥
भूतं भव्यं भविष्यदिति पर्याप्ती-र्जुहोति ।
सुवर्गस्य लोकस्य पर्याप्त्यै ॥
आ मे गृहा भवन्त्वित्याभू-र्जुहोति । सुवर्गस्य लोकस्या भूत्यै ॥
अग्निना तपो-ऽन्वभवदित्यनुभू-र्जुहोति । सुवर्गस्य लोकस्यानुभूत्यै ॥

स्वाहा-ऽऽधिमाधीताय स्वाहेति समस्तानि वैश्वदेवानि जुहोति ।
समस्तमेव द्विषन्तं भ्रातृव्य-मतिक्रामति ॥ **65 (10)**

**T.B.3.8.17.4**

दद्भ्यः स्वाहा हनूभ्याꣳ स्वाहेत्यङ्गहोमा-ञ्जुहोति ।
अङ्गे अङ्गे वै पुरुषस्य पाप्मोपश्लिष्टः ।
अङ्गादङ्गा देवैनं पाप्मनस्तेन मुञ्चति ॥
अञ्ज्येताय स्वाहा कृष्णाय स्वाहा श्वेताय स्वाहेत्य-
श्वरूपाणि जुहोति ।
रूपैरेवैनꣳ समर्द्धयति ॥
ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहेत्योषधि होमाञ्जुहोति ।
द्वय्यो वा ओषधयः । पुष्पेभ्योऽन्याः फलं गृह्णन्ति ।
मूलेभ्योऽन्याः । ता एवोभयीरवरुन्धे ॥ **66 (10)**

**T.B.3.8.17.5**

वनस्पतिभ्यः स्वाहेति वनस्पति-होमाञ्जुहोति ।
आरण्यस्यान्नाद्यस्यावरुद्ध्यै ॥
मेषस्त्वा पचतै-रवत्वित्य-पाव्यानि जुहोति ।

प्राणा वै देवा अपाव्याः । प्राणानेवावरुन्धे ॥

कूप्याभ्यः स्वाहाऽद्भ्यः स्वाहेत्यपा२ होमाञ्जुहोति ।

अफ्सु वा आपः । अन्नँ वा आपः ।

अद्भ्यो वा अन्नं जायते । यदेवाद्भ्योऽन्नं जायते ( ) ।

तदवरुन्धे ॥ **67 (11)**

*(पूर्वदीक्षा जुहोति पूर्व एव द्विषन्तम् भ्रातृव्यमतिक्राम – त्यनन्तरित्यै – क्रामति – रुन्धे – जायत एकं च) (A17)*

**3.8.18** <u>अनुवाकं 18 –सप्तमकाण्डगतान्नहोमानुवाका व्याख्यायन्ते</u>

**<u>T.B.3.8.18.1</u>**

अम्भा२सि जुहोति । अयँ वै लोको–ऽम्भा२सि ।

तस्य वसवो–ऽधिपतयः । अग्निर्ज्योतिः । यदम्भा२सि जुहोति ।

इममेव लोकमवरुन्धे । वसूना२ सायुज्यं गच्छति ।

अग्निं ज्योतिरवरुन्धे ॥ नभा२सि जुहोति ।

अन्तरिक्षँ वै नभा२सि । **68 (10)**

**T.B.3.8.18.2**

तस्य रुद्रा अधिपतयः । वायुर्ज्योतिः । यन्नभा॑ꣳसि जुहोति ।

अन्तरिक्षमेवा-वरुन्धे । रुद्राणा॒ꣳ सायुज्यं गच्छति ।

वायुं ज्योतिरवरुन्धे । महा॑ꣳसि जुहोति । असौ वै लोको महा॑ꣳसि ।

तस्यादित्या अधिपतयः। सूर्यो ज्योतिः । **69 (10)**

**T.B.3.8.18.3**

यन्महा॑ꣳसि जुहोति । अमुमेव लोकमवरुन्धे ।

आदित्याना॒ꣳ सायुज्यं गच्छति । सूर्यं ज्योतिरवरुन्धे ॥

नमो राज्ञे नमो वरुणायेति यव्यानि जुहोति ।

अन्नाद्यस्यावरुद्ध्यै ॥ मयोभूर्वातो अभि वातूस्रा इति गव्यानि जुहोति ।

पशूनामवरुद्ध्यै ॥

प्राणाय स्वाहा व्यानाय स्वाहेति सन्तति-होमाञ्जुहोति ।

सुवर्गस्य लोकस्य सन्तत्यै ॥ **70 (10)**

**T.B.3.8.18.4**

सिताय स्वाहा-ऽसिताय स्वाहेति प्रमुक्ती-र्जुहोति ।

सुवर्गस्य लोकस्य प्रमुक्त्यै ॥ पृथिव्यै स्वाहा-ऽन्तरिक्षाय स्वाहेत्याह ।

यथा यजुरेवैतत् ॥

दत्वते स्वाहा-ऽदन्तकाय स्वाहेति शरीर-होमाञ्जुहोति ।
पितृलोकमेव तैर्यजमानो-ऽवरुन्धे ॥
कस्त्वा युनक्ति स त्वा युनक्त्विति परिधीन्. युनक्ति ।
इमे वै लोकाः परिधयः । इमानेवास्मै लोकान्. युनक्ति ।
सुवर्गस्य लोकस्य समष्ट्यै ॥ **71 (10)**

**T.B.3.8.18.5**

यः प्राणतो य आत्मदा इति महिमानौ जुहोति ।
सुवर्गो वै लोको महः । सुवर्गमेव ताभ्यां ँलोकं ँयजमानोऽवरुन्धे ॥
आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामिति समस्तानि
ब्रह्मवर्चसानि जुहोति ।
ब्रह्मवर्चसमेव तैर्यजमानो ऽवरुन्धे ॥
जज्ञि बीजमिति जुहोत्य-नन्तरित्यै ॥
अग्नये समनम-त्पृथिव्यै समनमदिति सन्नति होमाञ्जुहोति ।
सुवर्गस्य लोकस्य संनत्यै ॥
भूताय स्वाहा भविष्यते स्वाहेति भूताभव्यौ होमौ जुहोति ।
अयं ँवै लोको भूतम् । **72 (10)**

**T.B.3.8.18.6**

असौ भविष्यत् । अनयोरेव लोकयोः प्रतितिष्ठति ।

सर्वस्याप्त्यै । सर्वस्यावरुद्ध्यै ॥

यदक्रन्दः प्रथमं जायमान इत्यश्वस्तोमीयं जुहोति ।

सर्वस्याप्त्यै । सर्वस्य जित्यै ॥ सर्वमेव तेनाप्नोति ।

सर्वं जयति । योऽश्वमेधेन यजते ( ) । **73 (10)**

**T.B.3.8.18.7**

य उ चैनमेवं वेद ॥ यज्ञꣳ रक्षाꣳस्य जिघाꣳसन् ।

स एतान् प्रजापति-र्नक्तꣳ होमानपश्यत् । तानजुहोत् ।

तैर्वै स यज्ञाद्रक्षाꣳस्यपाहन् । यन्नक्तꣳ होमाञ्जुहोति ।

यज्ञादेव तैर्यजमानो रक्षाꣳस्यपहन्ति ॥

उषसे स्वाहा व्युष्ट्यै स्वाहेत्यन्ततो जुहोति ।

सुवर्गस्य लोकस्य समष्ट्यै ॥ **74 (9)**

*(वै नभाꣳसि - सूर्यो ज्योतिः - सन्तत्यै - समष्ट्यै - भुतम् - यँजते - +नव च) (A18)*

3.8.19 अनुवाकं 19 –औपसथ्यदिने यूपप्रयोगाः

T.B.3.8.19.1

एकयूपो वैकादशिनी वा । अन्येषां यज्ञानां यूपा भवन्ति ।

एकवि॒ꣳशिन्यश्वमेधस्य । सुवर्गस्य लोकस्या–भिजित्यै ॥

बैल्.वो वा खादिरो वा पालाशो वा ।

अन्येषां यज्ञक्रतूनां यूपा भवन्ति ।

राज्जुदाल एकवि॒ꣳशत्य–रत्निरश्वमेधस्य ।

सुवर्गस्य लोकस्य समष्ट्यै ॥ नान्येषां पशूनां तेजन्या अवद्यन्ति ।

अवद्यन्त्यश्वस्य । 75 (10)

T.B.3.8.19.2

पाप्मा वै तेजनी । पाप्मनोऽपहत्यै ॥

प्लक्षशाखायामन्येषां पशूनामवद्यन्ति । वेतस–शाखाया–मश्वस्य ।

अफ्सुयोनिर्वा अश्वः । अफ्सुजो वेतसः ।

स्व एवास्य योनाव–वद्यति ॥

यूपेषु ग्राम्यान् पशून्नि-युञ्जन्ति । आरोकेष्वा–रण्यान्धारयन्ति ।

पशूनां व्यावृत्त्यै ( ) ॥ आ ग्राम्यान् पशून्–लभन्ते ।

प्रारण्यान्थ्सृजन्ति । पाप्मनो-ऽपहत्यै ॥ **76 (13)**

*(अश्वस्य - व्यावृत्त्यै त्रीणि च) (A19)*

**3.8.20** अनुवाकं 20 -यूपानां स्थानादयः

**T.B.3.8.20.1**

राज्जुदाल-मग्निष्ठं मिनोति । भ्रूणहत्याया अपहत्यै ॥

पौतुद्रवावभितो भवतः । पुण्यस्य गन्धस्यावरुद्ध्यै ।

भ्रूणहत्या-मेवास्मा-दपहत्य । पुण्येन गन्धेनोभयतः परिगृह्णाति ॥

षड्बैल्.वा भवन्ति । ब्रह्मवर्चसस्या-वरुद्ध्यै ॥ षट्खादिराः ।

तेजसो-ऽवरुद्ध्यै ॥ **77 (10)**

**T.B.3.8.20.2**

षट्पालाशाः । सोमपीथस्या-वरुद्ध्यै ॥ एकविꣳशतिः संपद्यन्ते ।

एकविꣳशतिर्वै देवलोकाः । द्वादश मासाः पञ्चर्तवः ।

त्रय इमे लोकाः । असावादित्य एकविꣳशः ।

एष सुवर्गो लोकः ।

सुवर्गस्य लोकस्य समष्ट्यै ॥ शतं पशवो भवन्ति । **78 (10)**

**T.B.3.8.20.3**

शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतितिष्ठति ॥

सर्वं ँवा अश्वमेद्ध्याप्नोति । अपरिमिता भवन्ति ।

अपरिमितस्या–वरुद्ध्यै ॥ ब्रह्मवादिनो वदन्ति । कस्माथ्सत्यात् ।

दक्षिणतो–ऽन्येषां पशूनामवद्यन्ति । उत्तरतो–ऽश्वस्येति ।

वारुणो वा अश्वः । **79 (10)**

**T.B.3.8.20.4**

एषा वै वरुणस्य दिक् । स्वायामेवास्य दिश्यवद्यति ।

यदितरेषां पशूनामवद्यति । शतदेवत्यं तेनावरुन्धे ॥

चिते–ऽग्ना–वधिवैतसे कटेऽश्वं चिनोति । अप्सु–योनिर्वा अश्वः ।

अप्सुजो वेतसः । स्व एवैनं ँयोनौ प्रतिष्ठापयति ॥

पुरस्ता–त्प्रत्यञ्चं तूपरं चिनोति । पश्चात्प्राचीनं गोमृगम् । **80 (10)**

**T.B.3.8.20.5**

प्राणापाना–वेवास्मिन् थ्सम्यञ्चौ दधाति ॥

अश्वं तूपरं गोमृगमिति सर्वहुत एताञ्जुहोति ।

एषां ँलोकाना–मभिजित्यै ॥ आत्मना–ऽभिजुहोति ।

सात्मानमेवैन९ं सतनुं करोति ॥ सात्माऽमुष्मिन् ँलोके भवति ।

य एवं वेद । अथो वसोरेव धारां तेनावरुन्धे ॥

इलुवर्दाय स्वाहा बलिवर्दाय स्वाहेत्याह ।

सम्ँवथ्सरो वा इलुवर्दः ( ) ।

परिवथ्सरो बलिवर्दः । सम्ँवथ्सरादेव परिवथ्सरादायुर वरुन्धे ।

आयुरेवास्मिन्-दधाति ।

तस्मादश्व-मेधयाजी जरसा विस्रसाऽमुं ँलोकमेति ॥ **81 (14)**

*(तेजसोऽवरुद्धै - भवन् - त्यश्वो - गोमृग - मिलुवर्द श्चत्वारि च)*
*(A20)*

**3.8.21** अनुवाकं 21 -चेतव्याग्नयादेर्विशेषः

**T.B.3.8.21.1**

एकवि॒ꣳशोऽग्निर्भवति । एकवि॒ꣳशः स्तोमः । एकवि॒ꣳशतिर्यूपाः ॥

यथा वा अश्वा वर्॒षभा वा वृषाणः सꣳस्फुरेरन्न् ।

एवमेतथ्स्तोमाः सꣳस्फुरन्ते । यदेकवि॒ꣳशाः । ते यथ्समृच्छेरन्न् ।

हन्येतास्य यज्ञः ॥ द्वादश एवाग्निः स्यादित्याहुः ।

द्वादशः स्तोमः । **82 (10)**

**T.B.3.8.21.2**

एकादश यूपाः ॥ यद्द्वादशो–ऽग्निर्भवति । द्वादश मासाः सम्ँवथ्सरः ।

सम्ँवथ्सरेणैवास्मा अन्नमवरुन्धे ॥ यद्दश यूपा भवन्ति ।

दशाक्षरा विराट् । अन्नं ँविराट् । विराजैवान्नाद्य–मवरुन्धे ।

य एकादशः । स्तन एवास्यै सः । **83 (10)**

**T.B.3.8.21.3**

दुह एवैनां तेन ॥ तदाहुः ।

यद्द्वादशोऽग्निः स्याद्द्वादशः स्तोम एकादश यूपाः ।

यथा स्थूरिणा यायात् । तादृक्तत् ॥

एकवि॒ꣳश एवाग्निः स्यादित्याहुः । एकवि॒ꣳशः स्तोमः ।

एकवि॒ꣳशतिर्यूपाः । यथा प्रष्टिभिर्याति ।

तादृगेव तत् ॥ **84 (10)**

**T.B.3.8.21.4**

यो वा अश्वमेधे तिस्रः ककुभो वेद । ककुद्ध राज्ञां भवति ।

एकवि॒ꣳशो–ऽग्निर्भवति । एकवि॒ꣳशः स्तोमः । एकवि॒ꣳशतिर्यूपाः ।

एता वा अश्वमेधे तिस्रः ककुभः । य एवं ँवेद ।

ककुद्ध राज्ञां भवति ॥

यो वा अश्वमेधे त्रीणि शीर्.षाणि वेद । शिरो ह राज्ञां भवति ( ) ।

एकवि॒ꣳशो-ऽग्निर्भवति । एकवि॒ꣳशः स्तोमः । एकवि॒ꣳशतिर्यूपाः ।

एतानि वा अश्वमेधे त्रीणि शीर्.षाणि । य एवं ँवेद ।

शिरो ह राज्ञां भवति ॥ **85 (16)**

*(द्वादशः स्तोमः-स- एव तच् - छिरो ह राज्ञां भवति षट्च)*

*(A21)*

**3.8.22** अनुवाकं 22 -उक्थ्याख्ये द्वितीयेऽहनि बहिष्पवमाने अश्वस्योद्गातृत्वम्

**T.B.3.8.22.1**

देवा वा अश्वमेधे पवमाने । सुवर्गं ँलोकं न प्राजानन्न् ।

तमश्वः प्राजानात् ।

यदश्वमेधे-ऽश्वेन मेद्ध्येनोदञ्चो बहिष्पवमानꣳ सर्पन्ति ।

सुवर्गस्य लोकस्य प्रज्ञात्यै ।

न वै मनुष्यः सुवर्गं लोकमञ्जसा वेद ।

अश्वो वै सुवर्गं ँलोकमञ्जसा वेद ॥ यदुद्गा-तोद्गायेत् ।

यथाऽक्षेत्रज्ञोऽन्येन पथा प्रतिपादयेत् ।

तादृक्तत् । **86 (10)**

**T.B.3.8.22.2**

उद्गातार–मपरुद्ध्य । अश्व–मुद्गीथाय वृणीते ।

यथा क्षेत्रज्ञो–ऽञ्जसा नयति ।

एवमेवैनमश्वः सुवर्गं ँलोकमञ्जसा नयति ॥ पुच्छमन्वारभन्ते ।

सुवर्गस्य लोकस्य समष्ट्यै ॥ हिं करोति । सामैवाकः ।

हिं करोति । उद्गीथ एवास्य सः ॥ **87 (10)**

**T.B.3.8.22.3**

वडबा उप रुन्धन्ति । मिथुनत्वाय प्रजात्यै ।

अथो यथोपगातार उपगायन्ति । तादृगेव तत् ॥

उदगासीदश्वो मेद्ध्य इत्याह । प्राजापत्यो वा अश्वः ।

प्रजापति–रुद्गीथः । उद्गीथमेवावरुन्धे ।

अथो ऋख्सामयोरेव प्रतितिष्ठति ॥ हिरण्येनोपाकरोति ( ) ।

ज्योतिर्वै हिरण्यम् । ज्योतिरेव मुखतो दधाति ।

यजमाने च प्रजासु च ।

अथो हिरण्यज्योतिरेव यजमानः सुवर्गं ँलोकमेति ॥ **88 (14)**

*(तथ् – स – उपाकरोति चत्वारि च) (A22)*

**3.8.23** अनुवाकं 23 -अश्वे पर्यग्न्यप्रयन्तानां पशूनां नियोजनं

**T.B.3.8.23.1**

पुरुषो वै यज्ञः । यज्ञः प्रजापतिः । यदश्वे पशून्नियुञ्जन्ति ।

यज्ञादेव तद्यज्ञं प्रयुङ्क्ते ॥ अश्वं तूपरं गोमृगम् । तानग्निष्ठ आलभते ।

सेनामुखमेव तथ्सꣳश्यति । तस्माद् राजमुखं भीष्मं भावुकम् ॥

आग्नेयं कृष्णग्रीवं पुरस्ता-ल्ललाटे । पूर्वाग्निमेव तं कुरुते । **89 (10)**

**T.B.3.8.23.2**

तस्मा-त्पूर्वाग्निं पुरस्ता-थ्स्थापयन्ति ॥ पौष्णमन्वञ्चम् ।

अन्नं वै पूषा । तस्मा-त्पूर्वाग्ना-वाहार्य-माहरन्ति ॥

ऐन्द्रापौष्ण मुपरिष्टात् । ऐन्द्रो वै राजन्योऽन्नं पूषा ।

अन्नाद्येनैवैन-मुभयतः परिगृह्णाति । तस्माद् राजन्योन्नादो भावुकः ॥

आग्नेयौ कृष्णग्रीवौ बाहुवोः । बाहुवोरेव वीर्यं धत्ते । **90 (10)**

**T.B.3.8.23.3**

तस्माद् राजन्यो बाहुबली भावुकः ॥ त्वाष्ट्रौ लोमशसक्थौ सक्थ्योः ।

सक्थ्योरेव वीर्यं धत्ते । तस्माद् राजन्य ऊरुबली भावुकः ॥

शितिपृष्ठौ बार्.हस्पत्यौ पृष्ठे । ब्रह्मवर्चस-मेवोपरिष्टाद्धत्ते ।

अथो कवचे एवैते अभितः पर्यूहते ।

तस्माद् राजन्यः सन्नद्धो वीर्यं करोति ॥ धात्रे पृषोदर-मधस्तात् ।
प्रतिष्ठामेवैतां कुरुते ( ) । अथो इयं वै धाता ।
अस्यामेव प्रतितिष्ठति ॥ सौर्यं बलक्षं पुच्छे । उथ्सेधमेव तं कुरुते ।
तस्मादुथ्सेधं भये प्रजा अभिसꣳश्रयन्ति ॥ **91 (15)**

*(कुरुते – धत्ते – कुरुते पञ्च च) (A23)*

=======================

**rapaataka Korvai with starting Padams of 1 to 23 Anuvaakams -**

(सांग्रहण्या – चतुष्टय्यो – यो वै – यः पितु – श्चत्वारो –
यथा निक्तम् – प्रजापतये त्वा– यथा प्रोक्षितं – विभूराह–
प्रजापतिरकामयताश्वमेधेन – प्रजापतिर्न किञ्च न – सावित्र – मा
ब्रह्मन् – प्रजापतिर् देवेभ्यः – प्रजापति रक्षाꣳसि –
प्रजापतिमीफ्सति – विभुरश्वनामान्य – म्भाꣳ – स्येकयूपो –
राज्जुदाल – मेकविꣳशो – देवाः – पुरुष स्त्रयोविꣳशतिः)

**Korvai with starting Padams of 1, 11, 21 Series of Dasinis :-**

(सांग्रहण्या – तस्मादश्वमेधयाजी – यत् परिमिता – यद् यज्ञमुखे –
यो दीक्षाम् – देवानेव – त्रय इमे – सिताय – प्राणापानावेवास्मिन्
– तस्माद् राजन्य एकनवतिः)

**First and Last Padam 3rd Ashtakam 8th Prapaatakam :-**

(सांग्रहण्या – सꣳश्रयन्ति)

॥ हरिः ओम् ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टके अष्टमः प्रपाठकः समाप्तः ॥

**Details of Dasini &Vaakyams for**
**Ashtakam 3 Prapaatakam 8 (TB 3.8)**

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam1 | 2 | 25 |
| Anuvakam 2 | 4 | 46 |
| Anuvakam 3 | 6 | 65 |
| Anuvakam 4 | 3 | 35 |
| Anuvakam 5 | 4 | 41 |
| Anuvakam 6 | 5 | 56 |
| Anuvakam7 | 3 | 35 |
| Anuvakam8 | 4 | 43 |
| Anuvakam9 | 5 | 49 |
| Anuvakam10 | 5 | 50 |
| Anuvakam11 | 2 | 28 |
| Anuvakam12 | 3 | 29 |
| Anuvakam13 | 3 | 37 |
| Anuvakam14 | 6 | 64 |
| Anuvakam15 | 3 | 37 |
| Anuvakam16 | 4 | 47 |
| Anuvakam17 | 5 | 51 |
| Anuvakam18 | 7 | 69 |
| Anuvakam19 | 2 | 23 |
| Anuvakam20 | 5 | 54 |
| Anuvakam21 | 4 | 46 |
| Anuvakam22 | 3 | 34 |
| Anuvakam23 | 3 | 35 |
| Total → | 91 | 999 |

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

## 3.कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टकं

## 3.9 तैत्तिरीय ब्राह्मणे तृतीयाष्टके नवमः प्रपाठकः

### (अश्वमेधस्य द्वितीय-तृतीया हर्विधानम्)

**3.9.1** अनुवाकं 1 -अष्टादशिनां ग्राभ्याणां आरण्यानां च पशूनां प्रयोगः

**T.B.3.9.1.1**

प्रजापति-रश्वमेधमसृजत । सोऽस्माथ्सृष्टो-ऽपाक्रामत् ।

तमष्टादशिभिरनु प्रायुङ्क्त । तमाप्नोत् । तमाप्त्वा ऽष्टादशिभिरवारुन्ध ।

यदष्टादशिन आलभ्यन्ते । यज्ञमेव तैराप्त्वा यजमानो-ऽवरुन्धे ॥

सम्ँवथ्सरस्य वा एषा प्रतिमा । यदष्टादशिनः ।

द्वादश मासाः पञ्चर्तवः । **1 (10)**

**T.B.3.9.1.2**

सम्ँवथ्सरोऽष्टादशः । यदष्टादशिन आलभ्यन्ते ।

सम्ँवथ्सरमेव तैराप्त्वा यजमानो-ऽवरुन्धे ॥

अग्निष्टे ऽन्यान् पशूनुपा-करोति ।

इतरेषु यूपेष्वष्टादशिनो-ऽजामित्वाय ॥

नव नवालभ्यन्ते सवीर्यत्वाय ॥ यदारण्यैः स॒ᳵ स्थापयेत् ।

व्यवस्येतां पिता पुत्रौ । व्यद्ध्वानः क्रामेयुः ।

विदूरं ग्रामयो र्ग्रामान्तौ स्याताम् । **2 (10)**

**T.B.3.9.1.3**

ऋक्षीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिनी-स्तस्करा

अरण्येष्वा-जायेरन्न् ॥

तदाहुः । अपशवो वा एते । यदारण्याः ।

यदारण्यैः सᳵस्थापयेत । क्षिप्रे यजमान-मरण्यं मृतᳺ हरेयुः ।

अरण्यायतना ह्यारण्याः पशव इति । यत्पशून्नालभेत ।

अनवरुद्धा अस्य पशवः स्युः । यत्पर्यग्नि-कृतानुथ्सृजेत् । **3 (10)**

**T.B.3.9.1.4**

यज्ञवेशसं कुर्यात् ॥ यत्पशूनालभते । तेनैव पशूनवरुन्धे ।

यत्पर्यग्नि-कृतानुथ्सृजत्य-यज्ञवेशसाय ।

अवरुद्धा अस्य पशवो भवन्ति ।

न यज्ञवेश संभवति । न यजमान-मरण्यं मृतᳺ हरन्ति ॥

ग्राम्यैः स७स्थापयति । एते वै पशवः क्षेमो नाम ।
सं पिता पुत्राव वस्यतः ( ) । समद्ध्वानः क्रामन्ति ।
समन्तिकं ग्रामयो-र्ग्रामान्तौ भवतः ।
नर्क्षीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिनी-स्तस्करा
अरण्येष्वा जायन्ते ॥ **4 (13)**

*(ऋतवः - स्याता - मुथ्सृजेथ् - स्यतस्त्रीणि च)(A1)*

**3.9.2** <u>अनुवाकं 2 -चातुर्मास्यपशूनां प्रयोगः</u>

**<u>T.B.3.9.2.1</u>**

प्रजापतिर-कामयतोभौ लोकाव-वरुन्धीयेति ।
स एतानुभयान् पशून पश्यत् । ग्राम्या७श्चा-रण्या७श्च । तानालभत ।
तैर्वै स उभौ लोकाव वारुन्ध । ग्राम्यैरेव पशुभिरिमं ँलोकम वारुन्ध ।
आरण्यैरमुम् । यद्ग्राम्यान् पशूनालभते ।
इममेव तैर्लोकमवरुन्धे । यदारण्यान् । **5 (10)**

**<u>T.B.3.9.2.2</u>**

अमुं तैः ॥ अनवरुद्धो वा एतस्य सम्ँवथ्सर इत्याहुः ।
य इत इतश्चातुर्मास्यानि सम्ँवथ्सरं (सम्ँवथ्सरं) प्रयुङ्क इति ।

एतावान्. वै सम्ँवथ्सरः । यच्चातुर्मास्यानि ।
यदेते चातुर्मास्याः पशव आलभ्यन्ते ।
प्रत्यक्षमेव तैः सम्ँवथ्सरं यजमानो-ऽवरुन्धे । ॥
वि वा एष प्रजया पशुभिर्. ऋद्ध्यते ।
यः सम्ँवथ्सरं प्रयुङ्क्ते । सम्ँवथ्सरः सुवर्गो लोकः । **6 (10)**

**T.B.3.9.2.3**

सुवर्गं तु लोकं नापराद्ध्नोति । प्रजा वै पशव एकादशिनी ।
यदेत ऐकादशिनाः पशव आलभ्यन्ते ।
साक्षादेव प्रजां पशून्. यजमानो-ऽवरुन्धे ॥
प्रजापति-र्विराजमसृजत । सा सृष्टाऽश्वमेधं प्राविशत् ।
तां दशिभिरनु प्रायुङ्क्त । तामाप्नोत् ।
तामाप्त्वा दशिभिरवारुन्ध । यद्दशिन आलभ्यन्ते । **7 (10)**

**T.B.3.9.2.4**

विराजमेव तैराप्त्वा यजमानो-ऽवरुन्धे ॥ एकादश दशत आलभ्यन्ते ।
एकादशाक्षरा त्रिष्टुप् । त्रैष्टुभाः पशवः । पशूनेवावरुन्धे ॥
वैश्वदेवो वा अश्वः। नानादेवत्याः पशवो भवन्ति ।

अश्वस्य सर्वत्वाय । नानारूपा भवन्ति । तस्मान्नानारूपाः पशवः( ) ।
बहुरूपा भवन्ति । तस्माद् बहुरूपाः पशवः समृद्ध्यै ॥ **8 (12)**

*(आरण्यान्-ँल्लोको-दशिन आलभ्यन्ते-नानारूपाः*
*पशवो द्वे च) (A2)*

**3.9.3** अनुवाकं 3 -रोहितादीनां पशूनां वपाहोमसाहित्यम्

**T.B.3.9.3.1**

अस्मै वै लोकाय ग्राम्याः पशव आलभ्यन्ते । अमुष्मा आरण्याः ।
यद्ग्राम्यान् पशूनालभते । इममेव तैर्लोकमवरुन्धे । यदारण्यान् ।
अमुं तैः । उभयान् पशूनालभते । ग्राम्याऽश्चा-रण्याऽश्च ।
उभयोर् लोकयोर वरुद्ध्यै । उभयान् पशूनालभते । **9 (10)**

**T.B.3.9.3.2**

ग्राम्याऽश्चा-रण्याऽश्च । उभयस्या-न्नाद्यस्या-वरुद्ध्यै ।
उभयान् पशूनालभते । ग्राम्याऽश्चारण्याऽश्च ।
उभयेषां पशूनामवरुद्ध्यै ॥ त्रयस्त्रयो भवन्ति । त्रय इमे लोकाः ।
एषां ँल्लोकानामाप्त्यै ॥ ब्रह्मवादिनो वदन्ति । कस्माथ्सत्यात् । **10 (10)**

**T.B.3.9.3.3**

अस्मिन् ँल्लोके बहवः कामा इति ।

यथ्समानीभ्यो देवताभ्यो-ऽन्येऽन्ये पशव आलभ्यन्ते ।

अस्मिन्नेव तल्लोके कामान्दधाति ।

तस्मादस्मिन्-ँल्लोके बहवः कामाः ॥

त्रयाणां त्रयाणाꣳ सह वपा जुहोति । त्र्यावृतो वै देवाः ।

त्र्यावृत इमे लोकाः । एषां ँल्लोकानामाप्त्यै । एषां ँल्लोकानां क्लृप्त्यै ॥

पर्यग्नि-कृता-नारण्या-नुथ्सृजन्त्यहिꣳसायै ( ) ॥ **11 (10)**

*(अवरुद्ध्या उभयान् पशूनालभते - सत्या - दहिꣳसायै)(A3)*

**3.9.4 अनुवाकं 4 -अश्वस्य रथयोजनालंकारादयः**

**T.B.3.9.4.1**

युञ्जन्ति ब्रद्ध्नमित्याह । असौ वा आदित्यो ब्रद्ध्नः ।

आदित्य-मेवास्मै युनक्ति । अरुषमित्याह । अग्निर्वा अरुषः ।

अग्निमेवास्मै युनक्ति । चरन्तमित्याह । वायुर्वै चरन्न् ।

वायुमेवास्मै युनक्ति । परितस्थुष इत्याह । **12 (10)**

**T.B.3.9.4.2**

इमे वै लोकाः परितस्थुषः । इमानेवास्मै लोकान्. युनक्ति ॥

रोचन्ते रोचना दिवीत्याह । नक्षत्राणि वै रोचना दिवि ।

नक्षत्राण्येवास्मै रोचयति ॥ युञ्जन्त्यस्य काम्येत्याह ।

कामानेवास्मै युनक्ति ॥ हरी विपक्षसेत्याह ।

इमे वै हरी विपक्षसा । इमे एवास्मै युनक्ति ॥ **13 (10)**

**T.B.3.9.4.3**

शोणा धृष्णू नृवाहसेत्याह । अहोरात्रे वै नृवाहसा ।

अहोरात्रे एवास्मै युनक्ति ॥ एता एवास्मै देवता युनक्ति ।

सुवर्गस्य लोकस्य समष्ट्यै ॥

केतुं कृण्वन्न–केतव इति द्ध्वजं प्रतिमुञ्चति ।

यश एवैनꣳ राज्ञां गमयति ॥

जीमूतस्येव भवति प्रतीकमित्याह । यथा यजुरेवैतत् ॥

ये ते पन्थानः सवितः पूर्व्यास इत्यद्ध्वर्यु–र्यजमानं

ँवाचयत्यभिजित्यै ॥ **14 (10)**

**T.B.3.9.4.4**

परा वा एतस्य यज्ञ एति । यस्य पशुरुपा-कृतो-ऽन्यत्र वेद्या एति ।

एत७ स्तोतरेतेन पथा पुनरश्व-मावर्तयासि न इत्याह ।

वायुर्वै स्तोता । वायुमेवास्य परस्ताद्-दधात्यावृत्त्यै ॥

यथा वै हविषो गृहीतस्य स्कन्दति । एवं ँवा एतदश्वस्य स्कन्दति ।

यदस्योपाकृतस्य लोमानि शीयन्ते । यद्वालेषु काचानावयन्ति ।

लोमान्येवास्य तथ्संभरन्ति ॥ **15 (10)**

**T.B.3.9.4.5**

भूर्भुवस्सुवरिति प्राजापत्या-भिरावयन्ति । प्राजापत्यो वा अश्वः ।

स्वयैवैनं देवतया समर्द्धयन्ति ॥ भूरिति महिषी । भुव इति वावाता ।

सुवरिति परिवृक्ती । एषां ँलोकाना-मभिजित्यै ॥

हिरण्ययाः काचा भवन्ति । ज्योतिर्वै हिरण्यम् । राष्ट्रमश्वमेधः । **16 (10)**

**T.B.3.9.4.6**

ज्योतिश्चैवास्मै राष्ट्रं च समीची दधाति ॥ सहस्रं भवन्ति ।

सहस्र संमितः सुवर्गो लोकः । सुवर्गस्य लोकस्या-भिजित्यै ॥

अप वा एतस्मात्तेज इन्द्रियं पशवः श्रीः क्रामन्ति ।

योऽश्वमेधेन यजते ।

वसवस्त्वा-ऽञ्जन्तु गायत्रेण छन्दसेति महिष्यभ्यनक्ति ।

तेजो वा आज्यम् । तेजो गायत्री । तेजसैवास्मै तेजोऽवरुन्धे । **17 (10)**

**T.B.3.9.4.7**

रुद्रास्त्वा-ऽञ्जन्तु त्रैष्टुभेन छन्दसेति वावाता । तेजो वा आज्यम् ।

इन्द्रियं त्रिष्टुप् । तेजसैवास्मा इन्द्रियमवरुन्धे ।

आदित्या-स्त्वा-ऽञ्जन्तु जागतेन छन्दसेति परिवृक्ती ।

तेजो वा आज्यम् । पशवो जगती ।

तेजसैवास्मै पशूनवरुन्धे ॥

पत्नयो-ऽभ्यञ्जन्ति । श्रिया वा एतद् रूपम् । **18 (10)**

**T.B.3.9.4.8**

यत्पत्नयः । श्रिय-मेवास्मिन् तद्दधति ।

नास्मात्तेज इन्द्रियं पशवः श्रीरपक्रामन्ति ॥

लाजी(3)ञ्छाची(3)न्. यशो ममाँ(4) इत्यतिरिक्त-मन्नमश्वायो पाहरन्ति ।

प्रजामेवान्नादीं कुर्वते ॥

एतद्देवा अन्नमत्तैत-दन्नमद्धि प्रजापत इत्याह ।

प्रजायामेवान्नाद्यं दधते ॥

यदि नावजिघ्रेत् । अग्निः पशुरासीदित्यव-घ्रापयेत् ।
अव हैव जिघ्रति ( ) ॥
आक्रान्. वाजी क्रमैरत्य-क्रमीद्वाजी द्यौस्ते पृष्ठं पृथिवी
सधस्थमित्यश्व-मनुमन्त्रयते ।
एषां ँलोकाना-मभिजित्यै ॥
समिद्धो अञ्जन्कृदरं मतीना-मित्यश्वस्या प्रियो भवन्ति
सरूपत्वाय ॥ **19 (13)** *(परितस्थुष इत्याहे - मे एवास्मै युनक्त्य - भिजित्यै-भर-न्त्यश्वमेधो - रुन्धे - रूपम् - जिघ्रति त्रीणि च)*
*(A4)*

**3.9.5** अनुवाकं 5 -ब्रह्मोद्यनामकः होतृब्राह्मणोस्संवादः

**T.B.3.9.5.1**

तेजसा वा एष ब्रह्मवर्चसेन व्यृद्ध्यते । यो-ऽश्वमेधेन यजते ।
होता च ब्रह्मा च ब्रह्मोद्यं ँवदतः ।
तेजसा चैवैनं ब्रह्मवर्चसेन च समर्द्धयतः ॥ दक्षिणतो ब्रह्मा भवति ।
दक्षिणत आयतनो वै ब्रह्मा । बार्.हस्पत्यो वै ब्रह्मा ।
ब्रह्मवर्चसमेवास्य दक्षिणतो (दक्षिणतो) दधाति ।

तस्माद्-दक्षिणोऽर्द्धो ब्रह्मवर्चसितरः ॥
उत्तरतो होता भवति । 20 (10)

**T.B.3.9.5.2**

उत्तरत आयतनो वै होता । आग्नेयो वै होता । तेजो वा अग्निः ।
तेज एवास्योत्तरतो दधाति । तस्मादुत्तरोऽर्द्ध-स्तेजस्वितरः ॥
यूपमभितो वदतः । यजमानदेवत्यो वै यूपः ।
यजमानमेव तेजसा च ब्रह्मवर्चसेन च समर्द्धयतः ॥
कि७ स्विदासीत्-पूर्वचित्ति-रित्याह ।
द्यौर्वै वृष्टिः पूर्वचित्तिः। 21 (10)

**T.B.3.9.5.3**

दिवमेव वृष्टिमवरुन्धे ॥ कि७ स्विदासीद्-बृहद्वय इत्याह ।
अश्वो वै बृहद्वयः । अश्वमेवावरुन्धे ॥
कि७ स्विदासीत्-पिशङ्गिलेत्याह । रात्रिर्वै पिशङ्गिला ।
रात्रिमेवावरुन्धे ॥ कि७ स्विदासीत्-पिलिप्पिलेत्याह ।
श्रीर्वै पिलिप्पिला । अन्नाद्यमेवावरुन्धे ॥ 22 (10)

**T.B.3.9.5.4**

कः स्विदेकाकी चरतीत्याह । असौ वा आदित्य एकाकी चरति ।

तेज एवावरुन्धे ॥ क उ स्विज्जायते पुनरित्याह ।

चन्द्रमा वै जायते पुनः । आयुरेवावरुन्धे ॥

कि॒ स्विद्धिमस्य भेषजमित्याह ।

अग्निर्वै हिमस्य भेषजम् । ब्रह्मवर्चसमेवावरुन्धे ॥

कि॒ स्विदा–वपनं महदित्याह । **23 (10)**

**T.B.3.9.5.5**

अयं ँवै लोक आवपनं महत् । अस्मिन्नेव लोके प्रतितिष्ठति ॥

पृच्छामि त्वा परमन्तं पृथिव्या इत्याह । वेदिर्वै परोऽन्तः पृथिव्याः ।

वेदिमेवावरुन्धे ॥ पृच्छामि त्वा भुवनस्य नाभिमित्याह ।

यज्ञो वै भुवनस्य नाभिः । यज्ञमेवावरुन्धे ॥

पृच्छामि त्वा वृष्णो अश्वस्य रेत इत्याह ।

सोमो वै वृष्णो अश्वस्य रेतः ( ) । सोमपीथ–मेवावरुन्धे ॥

पृच्छामि वाचः परमं ँव्योमेत्याह । ब्रह्म वै वाचः परमं ँव्योम ।

ब्रह्मवर्चस–मेवावरुन्धे ॥ **24 (14)**

*(होता भवति - वै वृष्टिः पूर्वचित्ति - रत्नाद्यमेवावरुन्धे - महदित्याह - सोमो वै वृष्णो अश्वस्य रेतश्चत्वारि च) (A5)*

**3.9.6** अनुवाकं 6 -अश्वस्य मृतोपचारः संज्ञपनप्रकारः

**T.B.3.9.6.1**

अप वा एतस्मा-त्प्राणाः क्रामन्ति । योऽश्वमेधेन यजते ।
प्राणाय स्वाहा व्यानाय स्वाहेति संज्ञप्यमान आहुती-र्जुहोति ।
प्राणानेवास्मिन्दधाति । नास्मात्प्राणा अपक्रामन्ति ॥
अवन्तीः-स्थावन्ती-स्त्वा-ऽवन्तु । प्रियं त्वा प्रियाणाम् ।
वर्.षिष्ठमाप्यानाम् । निधीनां त्वा निधिपतिꣳ हवामहे
वसोम-मेत्याह । अपैवास्मै तद्ध्नुवते । **25 (10)**

**T.B.3.9.6.2**

अथो धुवन्त्येवैनम् । अथो न्येवास्मै ह्नुवते ॥ त्रिः परियन्ति ।
त्रय इमे लोकाः । एभ्य एवैनं ँल्लोकेभ्यो धुवते ॥
त्रिः पुनः परियन्ति । षट्-थ्संपद्यन्ते । षड्वा ऋतवः ।
ऋतुभिरेवैनं धुवते ॥ अप वा एतेभ्यः प्राणाः क्रामन्ति । **26 (10)**

**T.B.3.9.6.3**

ये यज्ञे धुवनं तन्वते । नवकृत्वः परियन्ति । नव वै पुरुषे प्राणाः ।

प्राणानेवात्मन्दधते । नैभ्यः प्राणा अपक्रामन्ति ॥

अम्बे अम्बाल्यम्बिक इति पत्नीमुदानयति । अह्वतैवैनाम् ॥

सुभगे काम्पील–वासिनीत्याह । तप एवैना–मुपनयति ॥

सुवर्गे लोके संप्रोर्ण्वाथा–मित्याह । **27 (10)**

**T.B.3.9.6.4**

सुवर्गमेवैनां ँल्लोकं गमयति ॥

आऽहमजानि गर्भधमा त्वमजासि गर्भधमित्याह ।

प्रजा वै पशवो गर्भः । प्रजामेव पशूनात्मन्धत्ते ॥

देवा वा अश्वमेधे पवमाने । सुवर्गं ँल्लोकं न प्राजानन् ।

तमश्वः प्राजानात् । यथ्सूचीभि–रसिपथा–न्कल्पयन्ति ।

सुवर्गस्य लोकस्य प्रज्ञात्यै ॥ गायत्री त्रिष्टुब्जगतीत्याह । **28 (10)**

**T.B.3.9.6.5**

यथा यजुरेवैतत् ॥ त्रय्यः सूच्यो भवन्ति ।

अयस्मय्यो रजता हरिण्यः । अस्य वै लोकस्य रूपमयस्मय्यः ।

अन्तरिक्षस्य रजताः । दिवो हरिण्यः । दिशो वा अयस्मय्यः ।

अवान्तरदिशा रजताः । ऊर्द्ध्वा हरिण्यः ।

दिश एवास्मै कल्पयति ( ) ॥

कस्त्वा-छ्यति कस्त्वा विशास्ती-त्याहा हिꣳसायै ॥ **29 (11)**

*(ह्वुवते-क्राम-न्त्यूर्ण्वाथामित्याह-जगतीत्याह-कल्पयत्येकं च) (A6)*

**3.9.7** अनुवाकं 7 –तत्र मन्त्राः

**T.B.3.9.7.1**

अप वा एतस्माच्छ्री राष्ट्रं क्रामति । योऽश्वमेधेन यजते ।

ऊर्द्ध्वामेना-मुच्छ्रयता-दित्याह । श्रीर्वै राष्ट्रमश्वमेधः ।

श्रियमेवास्मै राष्ट्रमूर्द्ध्व-मुच्छ्रयति ॥ वेणुभारं गिरावि-वेत्याह ।

राष्ट्रं ँवै भारः । राष्ट्रमेवास्मै पर्यूहति ॥

अथास्या मद्ध्यमेधता-मित्याह । श्रीर्वै राष्ट्रस्य मद्ध्यम् । **30 (10)**

**T.B.3.9.7.2**

श्रियमेवा-वरुन्धे ॥ शीते वाते पुनन्नि-वेत्याह ।

क्षेमो वै राष्ट्रस्य शीतो वातः । क्षेममेवा-वरुन्धे ॥

यद्धरिणी यवमत्तीत्याह । विड्वै हरिणी । राष्ट्रं ँयवः ।

विशं चैवास्मै राष्ट्रं च समीची दधाति ॥

न पुष्टं पशु मन्यत इत्याह ।

तस्माद् राजा पशून्न पुष्यति ॥ 31 (10)

**T.B.3.9.7.3**

शूद्रा यदर्यजारा न पोषाय धनायतीत्याह ।

तस्मा–द्वैशीपुत्रं नाभिषिञ्चन्ते ॥ इयं ँयका शकुन्तिकेत्याह ।

विड्वै शकुन्तिका । राष्ट्रमश्वमेधः ।

विशं चैवास्मै राष्ट्रं च समीची दधाति ॥ आहलमिति सर्पतीत्याह ।

तस्माद् राष्ट्राय विशः सर्पन्ति ॥

आहतं गभे पस इत्याह । विड्वै गभः । 32 (10)

**T.B.3.9.7.4**

राष्ट्रं पसः । राष्ट्रमेव विश्याहन्ति । तस्माद् राष्ट्रं ँविशं घातुकम् ॥

माता च ते पिता च त इत्याह । इयं ँवै माता । असौ पिता ।

आभ्यामेवैनं परिददाति ॥ अग्रं ँवृक्षस्य रोहत इत्याह ।

श्रीर्वै वृक्षस्याग्रम् । श्रियमेवावरुन्धे ॥ 33 (10)

**T.B.3.9.7.5**

प्रसुलामीति ते पिता गभे मुष्टिमत॒ꣳसय–दित्याह । विड्वै गभः ।

राष्ट्रं मुष्टिः । राष्ट्रमेव विश्याहन्ति । तस्माद् राष्ट्रं ँविशं घातुकम् ॥

अप वा एतेभ्यः प्राणाः क्रामन्ति । ये यज्ञेऽपूतं ँवदन्ति ।

दधिक्राव्.ण्णो अकारिषमिति सुरभि–मतीमृचं ँवदन्ति ।

प्राणा वै सुरभयः । प्राणानेवात्मन्दधते ( ) ।

नैभ्यः प्राणा अपक्रामन्ति ॥

आपो हिष्ठा मयोभुव इत्यद्भिर्मार्जयन्ते । आपो वै सर्वा देवताः ।

देवताभिरे–वात्मानं पवयन्ते ॥ **34 (14)**

*(राष्ट्रस्य मद्ध्यम् - पुष्यति - गर्भो - रुन्धे - दधते चत्वारि च)*

*(A7)*

**3.9.8** अनुवाकं 8 –अश्वमेधस्य तत्पशूनां च प्रशंसा

**T.B.3.9.8.1**

प्रजापतिः प्रजाः सृष्ट्वा प्रेणाऽनु प्राविशत् ।

ताभ्यः पुनः संभवितुं नाशक्नोत् । सोऽब्रवीत् । ऋद्ध्नवदित्थ्सः ।

यो मेतः पुनः संभरदिति । तं देवा अश्वमेधेनैव समभरन्न् ।

ततो वै त आर्द्ध्नुवन्न् । योऽश्वमेधेन यजते ।
प्रजापतिमेव संभरत्यृद्ध्नोति ॥ पुरुषमालभते । **35 (10)**

**T.B.3.9.8.2**

वैराजो वै पुरुषः । विराज–मेवालभते । अथो अन्नं ँवै विराट् ।
अन्नमेवावरुन्धे ॥ अश्वमालभते । प्राजापत्यो वा अश्वः ।
प्रजापति–मेवालभते । अथो श्रीर्वा एकशफम् ।
श्रिय–मेवावरुन्धे ॥ गामालभते । **36 (10)**

**T.B.3.9.8.3**

यज्ञो वै गौः । यज्ञमेवालभते । अथो अन्नं ँवै गौः । अन्नमेवावरुन्धे ॥
अजावी आलभते भूम्ने । अथो पुष्टिर्वै भूमा । पुष्टिमेवावरुन्धे ॥
पर्यग्निकृतं पुरुषं चारण्या॒–श्चोथ् सृजन्त्यहि॒ंसायै ॥
उभौ वा एतौ पशू आलभ्येते । यश्चावमो यश्च परमः ( ) ।
तेऽस्योभये यज्ञे बद्धाः । अभीष्टा अभिप्रीताः ।
अभिजिता अभिहुता भवन्ति ॥ नैनं दङ्क्ष्णवः पशवो यज्ञे बद्धाः ।
अभीष्टा अभिप्रीताः । अभिजिता अभिहुता हि॒ंसन्ति ।
योऽश्वमेधेन यजते । य उ चैनमेवं ँवेद ॥ **37 (18)**

*(लभते – गामालभते – परमोऽष्टौ च) (A8)*

**3.9.9** अनुवाकं 9 –उत्तमेऽहनि प्रशवः

**T.B.3.9.9.1**

प्रथमेन वा एष स्तोमेन राद्ध्वा । चतुष्टोमेन कृतेनायाना–मुत्तरेऽहन्न् ।
एकविꣳशे प्रतिष्ठायां प्रतितिष्ठति ॥
एकविꣳशा–त्प्रतिष्ठाया ऋतूनन्वारोहति ।
ऋतवो वै पृष्ठानि । ऋतवः सम्ँवथ्सरः ।
ऋतुष्वेव सम्ँवथ्सरे प्रतिष्ठाय । देवता अभ्यारोहति ।
शक्वरयः पृष्ठं भवन्त्य–न्यदन्य–च्छन्दः ।
अन्येऽन्ये वा एते पशव आलभ्यन्ते । **38 (10)**

**T.B.3.9.9.2**

उतेव ग्राम्याः । उतेवारण्याः । अहरेव रूपेण समर्द्धयति ।
अथो अह्न एवैष बलिर्.ह्रियते ॥ तदाहुः । अपशवो वा एते ।
यदजा–वयश्चारण्याश्च । एते वै सर्वे पशवः । यद्गव्या इति ।
गव्यान् पशूनुत्तमेऽहन्नालभते । **39 (10)**

**T.B.3.9.9.3**

तेनैवोभयान् पशूनवरुन्धे ॥ प्राजापत्या भवन्ति ।

अनभिजितस्या-भिजित्यै ॥ सौरीर्नव श्वेतावशा अनूबन्ध्या भवन्ति ।

अन्तत एव ब्रह्मवर्चसमवरुन्धे ॥

सोमाय स्वराज्ञे-ऽनोवाहा-वनड्वाहाविति द्वन्द्विनः पशूनालभते ।

अहोरात्राणा-मभिजित्यै ॥ पशुभिर्वा एष व्यृद्ध्यते ।

योऽश्वमेधेन यजते ।

छगलं कल्माषं किकिदीविं ँविदीगयमिति त्वाष्ट्रान् पशूनालभते ( ) ।

पशुभिरेवात्मानं समर्द्धयति ॥

ऋतुभिर्वा एष व्यृद्ध्यते । योऽश्वमेधेन यजते ।

पिशङ्गा-स्त्रयो वासन्ता इत्यृतु-पशूनालभते ।

ऋतुभिरे-वात्मानं समर्द्धयति ॥ आ वा एष पशुभ्यो वृश्च्यते ।

योऽश्वमेधेन यजते । पर्यग्निकृता उथ्सृजन्त्यनाव्रस्काय ॥ **40 (18)**

*(लभ्यन्ते - लभते - त्वाष्ट्रान् पशूनालभतेऽष्टौ च) (A9)*

**3.9.10** अनुवाकं 10 -महिमाभिधानौ प्रहौ

**T.B.3.9.10.1**

प्रजापति-रकामयत महानन्नादः स्यामिति ।

स एतावश्वमेधे महिमानावपश्यत् । तावगृह्णीत ।

ततो वै स महानन्नादो-ऽभवत् ।

यः कामयेत महानन्नादः स्यामिति । स एतावश्वमेधे महिमानौ गृह्णीत ।

महानेवान्नादो भवति ॥ यजमानदेवत्या वै वपा । राजा महिमा ।

यद्वपां महिम्नोभयतः परियजति ( ) ।

यजमानमेव राज्येनोभयतः परिगृह्णाति ॥

पुरस्ता-थ्स्वाहाकारा वा अन्ये देवाः ।

उपरिष्टा-थ्स्वाहाकारा अन्ये ।

ते वा एतेऽश्व एव मेद्ध्य उभये-ऽवरुद्ध्यन्ते ।

यद्वपां महिम्नोभयतः परियजति । तानेवोभयान् प्रीणाति ॥ **41 (16)**

*(परियजति षट्च) (A10)*

**3.9.11** अनुवाकं 11 –शरीरहोमाः स्विष्टकृदादयश्च

**T.B.3.9.11.1**

वैश्वदेवो वा अश्वः । तं यत्प्राजापत्यं कुर्यात् । या देवता अपिभागाः ।
ता भागधेयेन व्यर्द्धयेत् । देवताभ्यः समदं दद्ध्यात् ।
स्तेगान्-दꣳष्ट्राभ्यां मण्डूका-ञ्जम्भ्ये-भिरिति ।
आज्य-मवदानं कृत्वा प्रतिसंख्याय-माहुती-र्जुहोति ।
या एव देवता अपिभागाः । ता भागधेयेन समर्द्धयति ।
न देवताभ्यः समदं दधाति ॥ **42 (10)**

**T.B.3.9.11.2**

चतुर्दशैता-ननुवाकाञ्जुहोत्य-नन्तरित्यै ॥
प्रयासाय स्वाहेति पञ्चदशम् । पञ्चदश वा अर्द्धमासस्य रात्रयः ।
अर्द्धमासशः सम्ँवथ्सर आप्यते ॥ देवासुराः सम्ँयत्ता आसन्न् ।
तेऽब्रुवन्नग्नयः स्विष्टकृतः । अश्वस्य मेद्ध्यस्य वयमुद्धार-मुद्धरामहै ।
अथैतानभि-भवामेति । ते लोहित-मुदहरन्त ।
ततो देवा अभवन्न् । **43 (10)**

**T.B.3.9.11.3**

पराऽसुराः । यथ्स्विष्टकृद्भ्यो लोहितं जुहोति भ्रातृव्याभिभूत्यै ।
भवत्यात्मना । पराऽस्य भ्रातृव्यो भवति ॥
गोमृगकण्ठेन प्रथमा-माहुतिं जुहोति ।
पशवो वै गोमृगः । रुद्रोऽग्निः स्विष्टकृत् ।
रुद्रादेव पशूनन्तर्दधाति । अथो यत्रैषा-ऽऽहुतिर्. हूयते ।
न तत्र रुद्रः पशूनभिमन्यते ॥ **44 (10)**

**T.B.3.9.11.4**

अश्वशफेन द्वितीया-माहुतिं जुहोति । पशवो वा एकशफम् ।
रुद्रोऽग्निः स्विष्टकृत् । रुद्रादेव पशूनन्तर्दधाति ।
अथो यत्रैषा-ऽऽहुतिर्.हूयते । न तत्र रुद्रः पशूनभिमन्यते ॥
अयस्मयेन कमण्डलुना तृतीयाम् ।
आहुतिं जुहोत्या-यास्यो वै प्रजाः । रुद्रोऽग्निः स्विष्टकृत् ।
रुद्रादेव प्रजा अन्तर्दधाति ( ) । अथो यत्रैषा-ऽऽहुतिर्. हूयते ।
न तत्र रुद्रः प्रजा अभिमन्यते ॥ **45 (12)**

*(दधा - त्यभवन् - मन्यते - प्रजा अन्तर् दधाति द्वे च) (A11)*

**3.9.12** अनुवाकं 12 –तदुभयहोममध्यवर्त्यश्वस्तोमीयहोमः

**T.B.3.9.12.1**

अश्वस्य वा आलब्धस्य मेध उदक्रामत् । तदश्वस्तोमीय-मभवत् ।
यदश्वस्तोमीयं जुहोति । समेधमेवैन–मालभते ॥
आज्येन जुहोति । मेधो वा आज्यम् । मेधोऽश्वस्तोमीयम् ।
मेधेनैवास्मिन् मेधं दधाति ॥ षट्त्रि॒ꣳशतं जुहोति ।
षट्त्रिꣳशदक्षरा बृहती । **46 (10)**

**T.B.3.9.12.2**

बार्.हताः पशवः । सा पशूनां मात्रा । पशूनेव मात्रया समर्द्धयति ॥
ता यद्भूयसीर्वा कनीयसीर्वा जुहुयात् । पशून्मात्रया व्यर्द्धयेत् ।
षट्त्रिꣳशतं जुहोति । षट्त्रिꣳशदक्षरा बृहती । बार्.हताः पशवः ।
सा पशूनां मात्रा । पशूनेव मात्रया समर्द्धयति ॥ **47 (10)**

**T.B.3.9.12.3**

अश्वस्तोमीयꣳ हुत्वा द्विपदा जुहोति । द्विपाद्वै पुरुषो द्विप्रतिष्ठः ।
तदेनं प्रतिष्ठया समर्द्धयति ॥ तदाहुः ।
अश्वस्तोमीयं पूर्वꣳ होतव्याँ(3) द्विपदा(3) इति ।
अश्वो वा अश्वस्तोमीयम् । पुरुषो द्विपदाः ।

अश्वस्तोमीयꣳ हुत्वा द्विपदा जुहोति । तस्माद्-द्विपाच्चतुष्पादमत्ति ।

अथो द्विपद्येव चतुष्पदः प्रतिष्ठापयति ( ) ॥ द्विपदा हुत्वा ।

नान्यामुत्तरा-माहुतिं जुहुयात् । यदन्यामुत्तरा-माहुतिं जुहुयात् ।

प्र प्रतिष्ठायाश्च्यवेत । द्विपदा अन्ततो जुहोति प्रतिष्ठित्यै ॥ **48 (15)**

*(बृह - त्यर्द्धयति - स्थापयति पञ्च च) (A12)*

**3.9.13** अनुवाकं 13 -संवथ्सरानुष्ठानमिष्टीनाम्

**T.B.3.9.13.1**

प्रजापति-रश्वमेध-मसृजत । सो-ऽस्माथ्सृष्टो-ऽपाक्रामत् ।

तं ँयज्ञ-क्रतुभि-रन्वैच्छत् । तं ँयज्ञ-क्रतुभि-र्नान्वविन्दत् ।

तमिष्टिभि-रन्वैच्छत् । तमिष्टिभि-रन्वविन्दत् । तदिष्टीना-मिष्टित्वम् ।

यथ्सँवथ्सर-मिष्टिभि-र्यजते । अश्वमेव तदन्विच्छति ॥

सावित्रियो भवन्ति । **49 (10)**

**T.B.3.9.13.2**

इयं ँवै सविता । यो वा अस्यां नश्यति यो निलयते ।

अस्यां ँवाव तं ँविन्दन्ति । न वा इमां कश्चनेत्याहुः ।

तिर्यङ्नोर्द्ध्वो-ऽत्येतुमर्हतीति । यथ्सावित्रियो भवन्ति ।

सवितृ-प्रसूत एवैनमिच्छति ॥

ईश्वरो वा अश्वः प्रमुक्तः परां परावतं गन्तोः ।

यथ्सायं धृतीर्जुहोति । अश्वस्य यत्यै धृत्यै ॥ **50 (10)**

**T.B.3.9.13.3**

यत्प्रातरिष्टिभि-र्यजते । अश्वमेव तदन्विच्छति ।

यथ्सायं धृतीर्जुहोति । अश्वस्यैव यत्यै धृत्यै ।

तस्माथ्सायं प्रजाः क्षेम्या भवन्ति ॥ यत्प्रात-रिष्टिभि-र्यजते ।

अश्वमेव तदन्विच्छति । तस्माद्दिवा नष्टैष एति ॥

यत्प्रातरिष्टिभि-र्यजते सायं धृतीर्जुहोति ।

अहोरात्राभ्या-मेवैन-मन्विच्छति ( ) ।

अथो अहोरात्राभ्या-मेवास्मै योगक्षेमं कल्पयति ॥ **51 (11)**

*(भवन्ति - धृत्या - एन मन्विच्छत्येकं च) (A13)*

**3.9.14** अनुवाकं 14 -तास्विष्टिषु ब्राह्मणराजन्ययोर्गानम्

**T.B.3.9.14.1**

अप वा एतस्माच्छ्री राष्ट्रं क्रामति । योऽश्वमेधेन यजते ।

ब्राह्मणौ वीणागाथिनौ गायतः । श्रिया वा एतद् रूपम् । यद्वीणा ।

श्रिय-मेवास्मि-न्तद्धत्तः । यदा खलु वै पुरुषः श्रियमश्नुते ।

वीणाऽस्मै वाद्यते ॥ तदाहुः ।

यदुभौ ब्राह्मणौ गायेताम् । **52 (10)**

**T.B.3.9.14.2**

प्रभ्र७्शुका-ऽस्माच्छ्रीः स्यात् । न वै ब्राह्मणे श्री रमत इति ।

ब्राह्मणोऽन्यो गायेत् । राजन्योऽन्यः ।

ब्रह्म वै ब्राह्मणः । क्षत्र७् राजन्यः ।

तथा हास्य ब्रह्मणा च क्षत्रेण चोभयतः श्रीः परिगृहीता भवति ॥

तदाहुः । यदुभौ दिवा गायेताम् । अपास्माद् राष्ट्रं क्रामेत् । **53 (10)**

**T.B.3.9.14.3**

न वै ब्राह्मणे राष्ट्र७् रमत इति । यदा खलु वै राजा कामयते ।

अथ ब्राह्मणं जिनाति । दिवा ब्राह्मणो गायेत् । नक्त७् राजन्यः ।

ब्रह्मणो वै रूपमहः । क्षत्रस्य रात्रिः ।

तथा हास्य ब्रह्मणा च क्षत्रेण चोभयतो राष्ट्रं परिगृहीतं भवति ॥

इत्यददा इत्ययजथा इत्यपच इति ब्राह्मणो गायेत् ।

इष्टापूर्तँवै ब्राह्मणस्य । **54 (10)**

**T.B.3.9.14.4**

इष्टापूर्ते–नैवैन॒ँ स समर्द्धयति ॥

इत्यजिना इत्ययुद्ध्यथा इत्यमु॒ँ संग्राम–महन्निति राजन्यः ।

युद्धं ँवै राजन्यस्य । युद्धेनैवैन॒ँ स समर्द्धयति ॥

अक्लृप्ता वा एतस्यर्तव इत्याहुः । योऽश्वमेधेन यजत इति ।

तिस्रोऽन्यो गायति तिस्रोऽन्यः । षट्थ्संपद्यन्ते । षड्वा ऋतवः ।

ऋतूनेवास्मै कल्पयतः ( ) ॥ ताभ्या॒ँ स॒ँस्थायाम् ।

अनोयुक्ते च शते च ददाति । शतायुः पुरुषः शतेन्द्रियः ।

आयुष्येवेन्द्रिये प्रतितिष्ठति ॥ **55 (14)**

*(गायेताम् – क्रामेद् – ब्राह्मणस्य – कल्पयतश्चत्वारि च) (A14)*

**3.9.15** अनुवाकं 15 –अवभृथहोमविशेषाः

**T.B.3.9.15.1**

सर्वेषु वा एषु लोकेषु मृत्यवोऽन्वायत्ताः ।

तेभ्यो यदाहुतीर्न जुहुयात् । लोके लोक एनं मृत्युर्विन्देत् ।

मृत्यवे स्वाहा मृत्यवे स्वाहेत्यभि पूर्वमाहुती–र्जुहोति ।

लोकाल्लोकादेव मृत्युमवयजते । नैनं ँलोके लोके मृत्युर्विन्दति ॥

यदमुष्मै स्वाहाऽमुष्मै स्वाहेति जुह्वथ्सं चक्षीत ।

बहुं मृत्युममित्रं कुर्वीत । मृत्यवे स्वाहेत्येकस्मा एवैका–ञ्जुहुयात् ।

एको वा अमुष्मिन् ँल्लोके मृत्युः । **56 (10)**

**T.B.3.9.15.2**

अशनया मृत्युरेव । तमेवामुष्मिन् ँल्लोकेऽवयजते ॥

भ्रूणहत्यायै स्वाहेत्यवभृथ आहुतिं जुहोति ।

भ्रूणहत्यामे वा वयजते ॥ तदाहुः । यद्भ्रूणहत्या ऽपात्र्याऽथ ।

कस्माद्–यज्ञेऽपि क्रियत इति ॥

अमृत्युर्वा अन्यो भ्रूणहत्याया इत्याहुः ।

भ्रूणहत्या वाव मृत्युरिति ।

यद्भ्रूणहत्यायै स्वाहेत्यवभृथ आहुतिं जुहोति ॥ **57 (10)**

**T.B.3.9.15.3**

मृत्युमे वा हुत्या तर्पयित्वा परिपाणं कृत्वा ।

भ्रूणघ्ने भेषजं करोति ॥ एता॑ ह वै मुण्डिभ औदन्यवः ।

भ्रूणहत्यायै प्रायश्चित्तिं ँविदाञ्चकार ।

यो हास्यापि प्रजायां ब्राह्मण॑ हन्ति । सर्वस्मै तस्मै भेषजं करोति ॥

जुम्बकाय स्वाहेत्यवभृथ उत्तमामाहुतिं जुहोति ।
वरुणो वै जुम्बकः । अन्तत एव वरुण-मवयजते ॥
खलतेर्विक्लिधस्य शुक्लस्य पिङ्गाक्षस्य मूर्द्धञ्जुहोति ( ) ।
एतद्वै वरुणस्य रूपं । रूपेणैव वरुणमवयजते ॥ **58 (12)**

*(लोके मृत्युर् - जुहोति - मूर्द्धञ्जुहोति द्वे च) (A15)*

**3.9.16** अनुवाकं 16 -उपाकरणमन्त्रव्याख्यानादिः

**T.B.3.9.16.1**

वारुणो वा अश्वः । तं देवतया व्यर्द्धयति । यत्प्राजापत्यं करोति ।
नमो राज्ञे नमो वरुणायेत्याह । वारुणो वा अश्वः ।
स्वयैवैनं देवतया समर्द्धयति ॥ नमोऽश्वाय नमः प्रजापतय इत्याह ।
प्राजापत्यो वा अश्वः । स्वयैवैनं देवतया समर्द्धयति ॥
नमोऽधिपतय इत्याह । **59 (10)**

**T.B.3.9.16.2**

धर्मो वा अधिपतिः । धर्ममेवा-वरुन्धे ॥
अधिपति-रस्यधिपतिं मा कुर्वधिपतिरहं प्रजानां भूयास-मित्याह ।
अधिपति-मेवैनꣳ समानानां करोति ॥ मां धेहि मयि धेहीत्याह ।

आशिषमेवैतामाशास्ते ॥ उपाकृताय स्वाहेत्युपाकृते जुहोति ।
आलब्धाय स्वाहेति नियुक्ते जुहोति ।
हुताय स्वाहेति हुते जुहोति ।
एषां ँलोकाना-मभिजित्यै ॥ **60 (10)**

**T.B.3.9.16.3**

प्र वा एष एभ्यो लोकेभ्यश्च्यवते । योऽश्वमेधेन यजते ।
आग्नेय-मैन्द्राग्न-माश्विनम् । तान् पशूनालभते प्रतिष्ठित्यै ॥
यदाऽऽग्नेयो भवति । अग्निः सर्वा देवताः । देवता एवावरुन्धे ॥
ब्रह्म वा अग्निः । क्षत्रमिन्द्रः । यदैन्द्राग्नो भवति । **61 (10)**

**T.B.3.9.16.4**

ब्रह्मक्षत्रे एवावरुन्धे ॥ यदाऽऽश्विनो भवति । आशिषामवरुद्ध्यै ॥
त्रयो भवन्ति । त्रय इमे लोकाः । एष्वेव लोकेषु प्रतितिष्ठति ॥
अग्नये-ऽꣳहोमुचे-ऽष्टाकपाल इति दशहविषमिष्टिं निर्वपति ।
दशाक्षरा विराट् । अन्नं ँविराट् । विराजै-वान्नाद्य-मवरुन्धे ( ) ॥
अग्नेर्मन्वे प्रथमस्य प्रचेतस इति याज्यानुवाक्या
भवन्ति सर्वत्वाय ॥ **62 (11)**

*(अधिपतय इत्या - हाभिजित्या - ऐन्द्राग्नो भवति - रुन्ध एकं च)*
*(A16)*

**3.9.17** अनुवाकं 17 -अश्वस्य रोगादिनिमित्तं प्रायश्चित्तम्

**T.B.3.9.17.1**

यद्यश्वमुपतपद्विन्देत् । आग्नेय-मष्टाकपालं निर्वपेत् ।
सौम्यं चरुम् । सावित्र-मष्टाकपालम् ॥ यदाग्नेयो भवति ।
अग्निः सर्वा देवताः । देवता-भिरेवैनं भिषज्यति ॥
यथ्सौम्यो भवति । सोमो वा ओषधीना९ँ राजा ।
याभ्य एवैनं ँविन्दति । **63 (10)**

**T.B.3.9.17.2**

ताभिरेवैनं भिषज्यति ॥ यथ्सावित्रो भवति ।
सवितृप्रसूत एवैनं भिषज्यति ॥ एताभिरेवैनं देवताभिर्-भिषज्यति ।
अगदो हैव भवति ॥ पौष्णं चरुं निर्वपेत् । यदि श्लोणः स्यात् ।
पूषा वै श्लौण्यस्य भिषक् । स एवैनं भिषज्यति ।
अश्लोणो हैव भवति ॥ **64 (10)**

**T.B.3.9.17.3**

रौद्रं चरुं निर्वपेत् । यदि महती देवता–ऽभिमन्येत ।

एतद्देवत्यो वा अश्वः । स्वयैवैनं देवतया भिषज्यति ।

अगदो हैव भवति ॥

वैश्वानरं द्वादश–कपालं निर्वपेन्मृगाखरे यदि नागच्छेत् ।

इयं ँवा अग्निर्वैश्वानरः । इयमेवैन–मर्चिभ्यां परिरोधमानयति ।

आ हैव सुत्यमह–र्गच्छति ॥ यद्यधीयात् । **65 (10)**

**T.B.3.9.17.4**

अग्नये–ऽ॒ग्॒होमुचेऽष्टाकपालः । सौर्यं पयः । वायव्य आज्यभागः ॥

यजमानो वा अश्वः । अ॒ग्॒हसा वा एष गृहीतः ।

यस्याश्वो मेधाय प्रोक्षितो–ऽद्ध्येति । यद॒ग्॒होमुचे निर्वपति ।

अ॒ग्॒हस एव तेन मुच्यते ॥ यजमानो वा अश्वः ।

रेतसा वा एष व्यृद्ध्यते । **66 (10)**

**T.B.3.9.17.5**

यस्याश्वो मेधाय प्रोक्षितो–ऽद्ध्येति । सौर्य॒ग्॒ रेतः ।

यथ्सौर्यं पयो भवति । रेतसैवैन॒ग्॒ स समर्द्धयति ॥

यजमानो वा अश्वः । गर्भैर्वा एष व्यृद्ध्यते ।

यस्याश्वो मेधाय प्रोक्षितो–ऽद्ध्येति । वायव्या गर्भाः ।

यद्वायव्य आज्यभागो भवति । गर्भैरेवैन॑ स समर्द्धयति ( ) ॥

अथो यस्यैषा–ऽश्वमेधे प्रायश्चित्तिः क्रियते ।

इष्ट्वा वसीयान् भवति ॥ **67 (12)** *(विन्द – त्यश्लोणो हैव भव – त्यधीया – दृद्ध्यते – गर्भैरेवैन॑ स समर्द्धयति द्वे च) (A17)*

**3.9.18** <u>अनुवाकं 18 –ब्रह्मौदना उच्यन्ते</u>

**<u>T.B.3.9.18.1</u>**

तदाहुः । द्वादश ब्रह्मौदनान् थ्सꣳस्थिते निर्वपेत् ।

द्वादशभिर्वेष्टिभि–र्यजेतेति ॥ यदिष्टि–भिर्यजेत ।

उपनामुक एनं ँयज्ञः स्यात् । पापीयाꣳस्तु स्यात् ।

आप्तानि वा एतस्य छन्दा॑सि । य ईजानः ।

तानि क एतावदाशु पुनः प्रयुञ्जीतेति ।

सर्वा वै सꣳस्थिते यज्ञे वागाप्यते । **68 (10)**

**<u>T.B.3.9.18.2</u>**

साऽऽप्ता भवति यातयाम्नी । क्रूरीकृतेव हि भवत्यरुष्कृता ।

सा न पुनः प्रयुज्येत्याहुः ॥

द्वादशैव ब्रह्मौदनान् थ्सꣳस्थिते निर्वपेत् ।

प्रजापतिर्वा ओदनः । यज्ञः प्रजापतिः ।

उपनामुक एनं ँयज्ञो भवति ।

न पापीयान् भवति ॥ द्वादश भवन्ति ।

द्वादश मासाः सम्ँवथ्सरः ( ) ।

सम्ँवथ्सर एव प्रतितिष्ठति ॥ **69 (11)**

*(आप्यते - सम्ँवथ्सर एकं च) (A18)*

**3.9.19** अनुवाकं 19 -विभुत्वादिभिः द्वादशभिर्गुणौरश्वमेधप्रशंसा

**T.B.3.9.19.1**

एष वै विभूर्नाम यज्ञः । सर्वꣳ ह वै तत्र विभु भवति ।

यत्रैतेन यज्ञेन यजन्ते ॥ एष वै प्रभूर्नाम यज्ञः ।

सर्वꣳ ह वै तत्र प्रभु भवति । यत्रैतेन यज्ञेन यजन्ते ॥

एष वा ऊर्जस्वान्नाम यज्ञः । सर्वꣳ ह वै तत्रोर्जस्व-द्भवति ।

यत्रैतेन यज्ञेन यजन्ते ॥ एष वै पयस्वान्नाम यज्ञः । **70 (10)**

**T.B.3.9.19.2**

सर्व॑ँ ह वै तत्र पय॑स्व-द्भवति । यत्रै॒तेन॑ य॒ज्ञेन॑ यज॑न्ते ॥

ए॒ष वै वि॑धृ॒तो नाम॑ य॒ज्ञः । सर्व॑ँ ह वै तत्र॒ विधृ॑तं भवति ।

य॒त्रै॒तेन॑ य॒ज्ञेन॑ यज॑न्ते ॥ ए॒ष वै व्यावृ॑त्तो नाम॑ य॒ज्ञः ।

सर्व॑ँ ह वै तत्र॒ व्याव॑त्तं भवति । यत्रै॒तेन॑ य॒ज्ञेन॑ यज॑न्ते ॥

ए॒ष वै प्रति॑ष्ठितो नाम॑ य॒ज्ञः ।

सर्व॑ँ ह वै तत्र॒ प्रति॑ष्ठितं भवति । **71 (10)**

**T.B.3.9.19.3**

य॒त्रै॒तेन॑ य॒ज्ञेन॑ यज॑न्ते ॥ ए॒ष वै ते॑जस्वी नाम॑ य॒ज्ञः ।

सर्व॑ँ ह वै तत्र॑ तेज॒स्वि भ॑वति । यत्रै॒तेन॑ य॒ज्ञेन॑ यज॑न्ते ॥

ए॒ष वै ब्र॑ह्मवर्च॒सी नाम॑ य॒ज्ञः ।

आ ह॒ वै तत्र॑ ब्राह्म॒णो ब्र॑ह्मवर्च॒सी जायते । यत्रै॒तेन॑ य॒ज्ञेन॑ यज॑न्ते ॥

ए॒ष वा अ॑तिव्या॒धी नाम॑ य॒ज्ञः ।

आ ह॒ वै तत्र॑ राज॒न्यो॑-ऽतिव्या॒धी जा॑यते । यत्रै॒तेन॑ य॒ज्ञेन॑ यज॑न्ते ( ) ॥

ए॒ष वै दी॒र्घो नाम॑ य॒ज्ञः । दी॒र्घायु॑षो ह॒ वै तत्र॑ मनु॒ष्या॑ भवन्ति ।

य॒त्रै॒तेन॑ य॒ज्ञेन॑ यज॑न्ते ॥ ए॒ष वै क्लृ॒प्तो नाम॑ य॒ज्ञः ।

कल्पते ह वै तत्र प्रजाभ्यो योगक्षेमः ।

यत्रैतेन यज्ञेन यजन्ते ॥ **72 (16)**

*(पयस्वान्नाम यज्ञः - प्रतिष्ठितं भवति - यत्रैतेन यज्ञेन यजन्ते षट्च) (A19)*

<u>Special Korvai</u>

*(एष वै विभूः प्रभूरूर्जस्वान् पयस्वान्. विधृतो व्यावृत्तः प्रतिष्ठितस्तेजस्वी ब्रह्मवर्चस्यतिव्याधी दीर्घः क्लुप्तो द्वादश)*

**3.9.20** <u>अनुवाकं 20 -अश्वसंज्ञपनप्रकारः</u>

**<u>T.B.3.9.20.1</u>**

तार्प्येणाश्वꣳ संज्ञपयन्ति । यज्ञो वै तार्प्यम् ।

यज्ञेनैवैनꣳ समर्द्धयन्ति ॥ यामेन साम्ना प्रस्तोता-ऽनूपतिष्ठते ।

यमलोक-मेवैनं गमयति ॥

तार्प्ये च कृत्यधीवासे चाश्वꣳ संज्ञपयन्ति ।

एतद्वै पशूनाꣳ रूपम् । रूपेणैव पशूनवरुन्धे ॥

हिरण्यकशिपु भवति । तेजसो-ऽवरुद्ध्यै ॥ **73 (10)**

**T.B.3.9.20.2**

रुक्मो भवति । सुवर्गस्य लोकस्या-नुख्यात्यै ॥ अश्वो भवति ।

प्रजापते-राप्त्यै ॥ अस्य वै लोकस्य रूपं ताप्र्यम् ।

अन्तरिक्षस्य कृत्त्यधीवासः । दिवो हिरण्यकशिपु ।

आदित्यस्य रुक्मः । प्रजापतेरश्वः ।

इममेव लोकं ताप्र्येणाप्नोति ( ) । **74 (10)**

**T.B.3.9.20.3**

अन्तरिक्षं कृत्यधीवासेन । दिवꣳ हिरण्यकशिपुना ।

आदित्यꣳ रुक्मेण ।

अश्वेनैव मेद्ध्येन प्रजापतेः सायुज्यꣳ सलोकता-माप्नोति ॥

एतासामेव देवतानाꣳ सायुज्यम् ।

सार्ष्टिताꣳ समान लोकतामाप्नोति ।

योऽश्वमेधेन यजते । य उ चैनमेवं वेँद ॥ **75 (8)**

*(अवरुद्ध्या - आप्नोत्य -+ष्टौ च) (A20)*

**3.9.21** अनुवाकं 21 -उत्तरवेद्युपवापः

**T.B.3.9.21.1**

आदित्याश्चाङ्गिरसश्च सुवर्गे लोकेऽस्पर्द्धन्त । तेऽङ्गिरस आदित्येभ्यः ।

अमुमादित्य-मश्वꣳ श्वेतं भूतं दक्षिणा-मनयन्न् । तेऽब्रुवन्न् ।

यं नोऽनेष्ट । स वर्योऽभूदिति । तस्मादश्वꣳ सवर्येत्या-ह्वयन्ति ।

तस्माद्यज्ञे वरो दीयते ॥ यत्प्रजापति-रालब्धो-ऽश्वो-ऽभवत् ।

तस्मादश्वो नाम ॥ **76 (10)**

**T.B.3.9.21.2**

यच्छ्वयदरुरासीत् । तस्मादर्वा नाम ॥

यथ्सद्यो वाजान् थ्समजयत् । तस्माद्वाजी नाम ॥

यदसुराणांꣳ लोकानादत्त । तस्मादादित्यो नाम ॥

अग्निर्वा अश्वमेधस्य योनिरायतनम् । सूर्यो-ऽग्नेर्योनि-रायतनम् ।

यदश्वमेधे-ऽग्नौ चित्य उत्तरवेदि-मुपवपति ।

योनि-मन्तमेवैन-मायतनवन्तं करोति ॥ **77 (10)**

**T.B.3.9.21.3**

योनि-मानायतनवान् भवति । स एवंꣳ वेद ॥

प्राणापानौ वा एतौ देवानाम् । यदर्काश्वमेधौ ।

प्राणापानावेवावरुन्धे ॥ ओजो बलं ँवा एतौ देवानाम् ।
यदर्काश्वमेधौ । ओजो बलमेवावरुन्धे ॥
अग्निर्वा अश्वमेधस्य योनि-रायतनम् ।
सूर्यो-ऽग्नेर्योनि-रायतनम् ( ) ।
यदश्वमेधे-ऽग्नौ चित्य उत्तरवेदिं चिनोति ।
तावर्काश्वमेधौ । अर्काश्वमेधावेवा वरुन्धे ।
अथो अर्काश्व-मेधयोरेव प्रतितिष्ठति ॥ **78 (14)**

*(नाम - करोति - सूर्योऽग्नेर्योनिरायतनम् चत्वारि च) (A21)*

**3.9.22** अनुवाकं 22 -ऋषभालम्भः

**T.B.3.9.22.1**

प्रजापतिं ँवै देवाः पितरम् । पशुं भूतं मेधायालभन्त ।
तमालभ्योपावसन्न् । प्रातर्यष्टास्मह इति ।
एकं ँवा एतद्देवानामहः । यथ्सम्ँवथ्सरः ।
तस्मादश्वः पुरस्ता-थ्सम्ँवथ्सर आलभ्यते ॥
यत्प्रजापति-रालब्धो-ऽश्वोऽभवत् । तस्मादश्वः ।
यथ्सद्यो मेधोऽभवत् । **79 (10)**

**T.B.3.9.22.2**

तस्मादश्वमेधः ॥ वेदुको-ऽश्वमाशुं भवति । य एवं वेद ॥

यद्वै तत्प्रजापति-रालब्धो-ऽश्वोऽभवत् ।

तस्मादश्वः प्रजापतेः पशूना-मनुरूपतमः ॥

आऽस्य पुत्रः प्रतिरूपो जायते । य एवं वेद ॥

सर्वाणि भूतानि संभृत्यालभते ।

समेनं देवा-स्तेजसे ब्रह्मवर्चसाय भरन्ति ।

योऽश्वमेधेन यजते । **80 (10)**

**T.B.3.9.22.3**

य उ चैनमेवं वेद ॥ एतद्वै तद्देवा एतां देवताम् ।

पशुं भूतं मेधायालभन्त । यज्ञमेव । यज्ञेन यज्ञमयजन्त देवाः ।

कामप्रं यज्ञम कुर्वत । तेऽमृतत्वमकामयन्त ।

तेऽमृतत्व-मगच्छन्न् ॥ योऽश्वमेधेन यजते ।

देवानामेवा-यनेनैति। **81 (10)**

**T.B.3.9.22.4**

प्राजापत्येनैव यज्ञेन यजते कामप्रेण । अपुनर्मारमेव गच्छति ॥

एतस्य वै रूपेण पुरस्ता-त्प्राजापत्य-मृषभं तूपरं

बहुरूप-मालभते ।

सर्वेभ्यः कामेभ्यः । सर्वस्याप्त्यै ।

सर्वस्य जित्यै ॥ सर्वमेव तेनाप्नोति । सर्वं जयति ।

योऽश्वमेधेन यजते । य उ चैनमेवं ँवेद ( ) ॥ **82 (10)**

*(मेधोऽभवद् - यजत - एति - वेद) (A22)*

**3.9.23** अनुवाकं 23 -अश्वावयवेषूपासनम्

**T.B.3.9.23.1**

यो वा अश्वस्य मेद्ध्यस्य लोमनी वेद ।

अश्वस्यैव मेद्ध्यस्य लोमं ँलोमञ्जुहोति ।

अहोरात्रे वा अश्वस्य मेद्ध्यस्य लोमनी । यथ्सायं प्रातर्जुहोति ।

अश्वस्यैव मेद्ध्यस्य लोमं ँलोमञ्जुहोति ।

एतदनुकृति हस्म वै पुरा । अश्वस्य मेद्ध्यस्य लोमं ँलोमञ्जुह्वति ॥

यो वा अश्वस्य मेद्ध्यस्य पदे वेद ।

अश्वस्यैव मेद्ध्यस्य पदे पदे जुहोति ।

दर्.शपूर्णमासौ वा अश्वस्य मेद्ध्यस्य पदे । **83 (10)**

**T.B.3.9.23.2**

यद्दर्.शपूर्णमासौ यजते । अश्वस्यैव मेद्ध्यस्य पदे पदे जुहोति ।

एतदनुकृति ह स्म वै पुरा । अश्वस्य मेद्ध्यस्य पदे पदे जुह्वति ॥

यो वा अश्वस्य मेद्ध्यस्य विवर्तनं वेद ।

अश्वस्यैव मेद्ध्यस्य विवर्तने विवर्तने जुहोति ।

असौ वा आदित्योऽश्वः । स आहवनीय-मागच्छति ।

तद्विवर्तते । यदग्निहोत्रं जुहोति ( ) ।

अश्वस्यैव मेद्ध्यस्य विवर्तने विवर्तने जुहोति ।

एतदनुकृति ह स्म वै पुरा ।

अश्वस्य मेद्ध्यस्य विवर्तने विवर्तने जुह्वति ॥ **84 (13)**

*(पदे - अग्निहोत्रं जुहोति त्रीणि च) (A23)*

**Prapaataka Korvai with starting Padams of 1 to 23 Anuvaakams :-**

(प्रजापतिस्तमष्टादशिभिः – प्रजापतिरकामयतोभा – वस्मै – युञ्जन्ति–तेजसा – ऽप प्राणा – अप श्रीरूर्द्ध्वम् – प्रजापतिः प्रेणाऽनु – प्रथमेन – प्रजापतिरकामयत महान्. – वैश्वदेवो वा अश्वो – ऽश्वस्य – प्रजापतिस्तं यँज्ञक्रतुभि – रप श्रीर्ब्राह्मणौ – सर्वेषु– वारुणो – यद्यश्वम् – तदाहु– रेष वै विभू – स्तार्प्येणा– दित्याः – प्रजापतिं पितरं – यँो वा अश्वस्य मेद्ध्यस्य लोमनी त्रयोविꣳशतिः)

**Korvai with starting Padams of 1, 11, 21 Series of Dasinis :-**

(प्रजापतिर – स्मिन् लोँके – उत्तरतः – श्रियमेव – प्रजापतिरकामयत महान्.–यत् प्रात – प्र वा एष एभ्यो लोकेभ्यः– सर्वꣳ ह वै तत्र पयस्वद्य –उ चैनमेवं वेँद चत्वार्यशीतिः)

**First and Last Padam 3rd Ashtakam 9th Prapaatakam :-**

(प्रजापतिरश्वमेधं – जुह्वति)

॥ हरिः ओम् ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टके नवमः प्रपाठकः समाप्तः ॥

**Details of Dasini &Vaakyams for Ashtakam 3 Prapaatakam 9 (TB 3.9)**

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam1 | 4 | 43 |
| Anuvakam 2 | 4 | 42 |
| Anuvakam 3 | 3 | 30 |
| Anuvakam 4 | 8 | 83 |
| Anuvakam 5 | 5 | 54 |
| Anuvakam 6 | 5 | 51 |
| Anuvakam7 | 5 | 54 |
| Anuvakam8<br>Anuvakam8 (as per Grantha) | 3<br>4 | 38<br>38 |
| Anuvakam9<br>Anuvakam 5 (as per Grantha) | 3<br>4 | 38<br>38 |
| Anuvakam10 | 1 | 16 |
| Anuvakam11 | 4 | 42 |
| Anuvakam12 | 3 | 35 |
| Anuvakam13 | 3 | 31 |
| Anuvakam14 | 4 | 44 |
| Anuvakam15 | 3 | 32 |

| | | |
|---|---|---|
| Anuvakam16 | 4 | 41 |
| Anuvakam17 | 5 | 52 |
| Anuvakam18 | 2 | 21 |
| Anuvakam19 | 3 | 36 |
| Anuvakam20 | 3 | 28 |
| Anuvakam21 | 3 | 34 |
| Anuvakam22 | 4 | 40 |
| Anuvakam23 | 2 | 23 |
| Total → | 84 | 908 |
| Total as per grantha book | 86 | 908 |

## Count for Ashtakam 3

| | Anuvaakam | Dasini | Vaakyams |
|---|---|---|---|
| Prapaatakam1 | 6 | 63 | 657 |
| Prapaatakam2 | 10 | 85 | 873 |
| Prapaatakam3 | 11 | 79 | 823 |
| Prapaatakam4 | 19 | 19 | 187 |
| Prapaatakam5 | 13 | 30 | 343 |
| Prapaatakam6 | 15 | 38 | 387 |
| Prapaatakam7 | 14 | 130 | 1353 |
| Prapaatakam8 | 23 | 91 | 999 |
| Prapaatakam9 | 23 | 84 | 908 |
| Total → | 134 | 619 | 6530 |
| Total as per Grantha | 134 | 620 | 6530 |